॥ श्रीरस्तु ॥

श्रीनवग्रह यन्त्र मन्त्र कवच स्तोत्राष्टोत्तरशतनामभिस्समेतं

॥ नवग्रहस्तोत्रम् ॥

चेन्नपुर्याम्

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्,

इत्येतैः प्रकटितम्

चेन्नपुर्याम्
श्रीराम मुद्रणालये
मुद्रितम् ॥

श्रीमदादित्यादि नवग्रहदेवताभ्यो नमः ॥

॥ सूर्ययन्त्रम् ॥

७	६	१	८	२	३	९	४	५
९	४	५	७	६	१	८	२	३
८	२	३	९	४	५	७	६	१
६	१	७	२	३	८	४	५	९
४	५	९	६	१	७	२	३	८
२	३	८	४	५	९	६	१	७
१	७	६	३	८	२	५	९	४
५	९	४	१	७	६	३	८	२
३	८	२	५	९	४	१	७	६

॥ सूर्यमन्त्रः ॥

ओम् अस्य श्री सूर्यमहामन्त्रस्य हिरण्यस्तूप ऋषिः ॥ त्रिष्टुप्छन्दः ॥ सूर्योदेवता ॥ ध्रीं बीजम् ॥ र्णी शक्तिः ॥ सूं कीलकम् ॥ मम सूर्यग्रहप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ सूर्याय अङ्गुष्ठाभ्यां नमः ॥ तेजोमूर्तये तर्जनीभ्यां स्वाहा ॥ वरदाय मध्यमाभ्यां वषट् ॥ हंसाय अनामिकाभ्यां हुम् ॥ शान्ताय कनिष्ठिकाभ्यां वौषट् ॥ कर्मसाक्षिणे करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिन्यासः ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम्—द्विभुजं पद्महस्तं च वरदं मकुटान्वितम् । ध्यायेद्दिवाकरं देवं सर्वाभीष्टप्रदायकम् ॥ लमित्यादि

पञ्चपूजा ॥ लं पृथिव्यात्मने गन्धं समर्पयामि ॥ हं आकाशात्मने पुष्पं समर्पयामि ॥ यं वाय्वात्मने धूपमाघ्रापयामि ॥ वं अमृतात्मने अमृतोपहारनैवेद्यं समर्पयामि ॥ सं सर्वात्मने सर्वोपचारान्समर्प-यामि ॥ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिर-ण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन् ॥ इति मन्त्रः ॥

—— ——

॥ सूर्यकवचः ॥

ओम् ॥ अस्य श्री आदित्यकवचस्तोत्रमहामन्त्रस्य अगस्त्यो भगवानृषिः ॥ अनुष्टुप्छन्दः ॥ आदित्यो देवता ॥ श्रीं बीजं ॥

णीं शक्तिः ॥ सूं कीलकम् ॥ मम आदित्यप्रसादसिद्ध्यर्थं जपे विनियोगः ॥ ध्यानम् ॥ जपाकुसुमसङ्काशं द्विभुजं पद्महस्तकम् । सिन्दूराम्बरमाल्यं च रक्तगन्धानुलेपनम् ॥ माणिक्यरत्नखचित सर्वाभरणभूषितम् । सप्ताश्वरथवाहं तु मेरुं चैव प्रदक्षिणम् । देवासुर-वरैर्वन्द्यं घृणिभिः परिसेवितम् । ध्यायेत्पठेत्सुवर्णाभं सूर्यस्य कवचं मुदा । घृणिः पातु शिरोदेशे सूर्यः पातु ललाटकम् । आदित्यो लोचने पातु श्रुती पातु दिवाकरः ॥ घ्राणं पातु सदा भानुः मुखं पातु सदा रविः । जिह्वां पातु जगन्नेत्रः कण्ठं पातु विभावसुः ॥ स्कन्धौ ग्रह-

पतिः पातु भुजौ पातु प्रभाकरः । करावब्जकरः पातु हृदयं पातु भानुमान् ॥ मध्यं पातु सुसप्ताश्वो नाभिं पातु नभोमणिः । द्वादशात्मा कटिं पातु सविता पातु सक्थिनी ॥ ऊरू पातु सुरश्रेष्ठो जानुनी पातु भास्करः । जङ्घे मे पातु मार्ताण्डो गुल्फौ पातु त्विषांपतिः । पादौ दिनमणिः पातु पातु मित्रोऽखिलं वपुः । आदित्यकवचं पुण्यमभेद्यं वज्रसन्निभम् ॥ सर्वरोगभयादिभ्यो मुच्यते नात्र संशयः । संवत्सरमुपासित्वा साम्राज्यपदवीं लभेत् ॥ ध्यानम् ॥ अनेकरत्नसंयुक्तं स्वर्णमाणिक्यभूषणम् । कल्पवृक्षसमाकीर्णं कदम्बकुसुमप्रियम ॥ अशेषरोगशान्त्यर्थं ध्यायेदादित्यमण्डलम् । सिन्दूर-

वर्णाय सुमण्डलाय सुवर्णरत्नाभरणाय तुभ्यम् ॥ पद्माधिनेत्रे च सुपङ्कजाय ब्रह्मेन्द्रनारायण शङ्कराय । संरक्तचूर्णं ससुवर्णतोयं सुकुङ्कुमाभं सकुशं सपुष्पम् । प्रदत्तमादाय च हेमपात्रे प्रशस्तनादं भगवन् प्रसीद ॥ इति श्रीपाद्मपुराणे आदित्यकवचस्सम्पूर्णः ॥

॥ सूर्यस्तोत्रम् ॥

अस्य श्रीभगवदादित्यस्तोत्रमहामन्त्रस्य अगस्त्यऋषिः अनुष्टुप्छन्दः ॥ सूर्यनारायणो देवता ॥ सूं बीजं ॥ यं शक्तिः ॥ मं कीलकं

मम आदित्यप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ आदित्याय -अङ्गुष्ठ

भ्यां नमः ।। अरारये तर्जनीभ्यां नमः ।। दिवाकराय मध्यमाभ्यां नमः ।। प्रभाकराय अनामिकाभ्यां नमः ।। सहस्रकिरणाय कनिष्ठिकाभ्यां नमः ।। मार्ताण्डाय करतलकरपृष्ठाभ्यां नमः ।। एवं हृदयादिन्यासः ।। भूर्भुवस्सुवरोमिति दिग्बन्धः ।। ध्यानम् ।। ध्यायेत्सूर्यमनन्तकोटिकिरणं तेजोमयं भास्करं भक्तानामभयप्रदं दिनकरं ज्योतिर्मयं शङ्करम् । आदित्यं जगदीशमच्युतमजं त्रैलोक्यचूडामणिं भक्ताभीष्टवरप्रदं दिनमणिं मार्ताण्डमाद्यं शुभम् ।। कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः । जन्ममृत्युजराव्याधिसंसारभयनाशनः ।। ब्रह्मस्वरूप हृदये मध्याह्ने तु महेश्वरः । अस्तमाने स्वयं विष्णुः

त्रयीमूर्तिर्दिवाकरः ॥ एकचक्ररथो यस्य दिव्यः कनकभूषितः । सोऽयं भवतु नः प्रीतः पद्महस्तो दिवाकरः ॥ पद्महस्त परं ज्योतिः परेशाय नमो नमः ॥ अण्डयोनिर्महासाक्षी आदित्याय नमो नमः ॥ कमलासन देवेश आदित्याय नमो नमः । धर्ममूर्तिर्दयामूर्तिस्तत्त्व-मूर्तिर्नमो नमः ॥ सकलेशाय सूर्याय क्षान्तीशाय नमो नमः । क्षयापस्मारगुल्मादिदुर्दोषव्याधिनाशनम् ॥ सर्वज्वरहरं चैव कुक्षि-रोगनिवारणम् । एतत् स्तोत्रं शिवप्रोक्तं सर्वसिद्धिकरं परम् । सर्व-सम्पत्करं चैव सर्वाभीष्टप्रदायकम् ॥

इति सूर्यनारायणस्तोत्रम् सम्पूर्णम् ॥

॥ सूर्याष्टोत्तरशतनामस्तोत्रम् ॥

अरुणाय शरण्याय करुणारससिन्धवे ।
असमानबलायार्तरक्षकाय नमो नमः ॥ १

आदित्ययादिभूताय अखिलागमवेदिने ।
अच्युतायाखिलज्ञाय अनन्ताय नमो नमः ॥ २

इनाय विश्वरूपाय इज्यायेन्द्राय भानवे ।
इन्दिरामन्दिराप्ताय वन्दनीयाय ते नमः ॥ ३

ईशाय सुप्रसन्नाय सुशीलाय सुवर्चसे ।
वसुप्रदाय वसवे वासुदेवाय ते तमः ॥ ४

उज्ज्वलायोग्ररूपाय ऊर्ध्वगाय विवस्वते ।
उद्यत्किरणजालाय हृषीकेशाय ते नमः ॥ ५.

ऊर्जस्वलाय वीराय निर्जराय जयाय च ।
ऊरुद्वयाभावरूपयुक्तसारथये नमः ॥ ६

ऋषिवन्द्याय रुग्घन्त्रे ऋक्षचक्रचराय च ।
ऋजुस्वभावचित्ताय नित्यस्तुत्याय ते नमः ॥ ७.

ॠकारमातृकावर्णरूपायोज्ज्वलतेजसे ।

ॠक्षाधिनाथमित्राय पुष्कराक्षाय ते नमः ॥ ८.

लुप्तदन्ताय शान्ताय कान्तिदाय घनाय च ।।
कनत्कनकभूषाय खद्योताय नमो नमः ।। ९
लूनिताखिलदैत्याय सत्यानन्दस्वरूपिणे ।
अपवर्गप्रदायार्तशरण्याय नमो नमः ।। १०
एकाकिने भगवते सृष्टिस्थित्यन्तकारिणे ।
गुणात्मने घृणिभृते बृहते ब्रह्मणे नमः ।। ११
ऐश्वर्यदाय शर्वाय हरिदश्वाय शौरये ।
दशदिक्सम्प्रकाशाय भक्तवश्याय ते नमः ।। १२
ओजस्कराय जयिने जगदानन्दहेतवे ।

जन्ममृत्युजराव्याधिवर्जिताय नमो नमः ॥ १३

उच्चस्थानसमारूढ रथस्थायासुरारये ।
कमनीयकरायाब्जवल्लभाय नमो नमः ॥ १४

अन्तर्बहिः प्रकाशाय अचिन्त्यायात्मरूपिणे ।
अच्युतायामरेशाय परस्मै ज्योतिषे नमः ॥ १५

अहस्कराय रवये हरये परमात्मने ।
तरुणाय वरेण्याय ग्रहाणां पतये नमः ॥ १६

ओं नमो भास्करायादिमध्यान्तरहिताय च ।

सौख्यप्रदाय सकलजगतां पतये नमः ॥ १७
नमस्सूर्याय कवये नमो नारायणाय च ।
नमो नमः परेशाय तेजोरूपाय ते नमः ॥ १८
ओं श्रीं हिरण्यगर्भाय ओं ह्रीं सम्पत्कराय च ।
ओं एमिष्टार्थदायानुप्रसन्नाय नमो नमः ॥ १९
श्रीमते श्रेयसे भक्तकोटिसौख्यप्रदायिने ।
निखिलागमवेद्याय नित्यानन्दाय ते नमः ॥ २०
यो मानवस्सन्ततमर्कमर्चयन्पठेत्प्रभाते विमलेन चेतसा ।
इमानि नामानि च तस्य पुण्यमायुर्धनं धान्यमुपैति नित्यम् ॥

इमं स्तवं देववरस्य कीर्तयेच्छृणोति योऽयं सुमनास्समाहितः ।
स मुच्यते शोकदवाग्निसागराल्लभेत सर्वान्मनसो यथेप्सितान् ॥

इति श्रीमदथर्वणरहस्ये सूर्याष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

॥ सूर्याष्टोत्तरशतनामावळिः ॥

ओं अरुणाय नमः
शरण्याय
करुणारससिन्धवे
असमानबलाय
आर्तरक्षकाय
आदित्याय
आदिभूताय
अखिलागमवेदिने
अच्युताय

ओं अखिलज्ञाय नमः १०
अनन्ताय
इनाय
विश्वरूपाय
इज्याय
इन्द्राय
भानवे
इन्दिरामन्दिराप्ताय
वन्दनीयाय

ओं ईशाय नमः
सुप्रसन्नाय २०
सुशीलाय
सुवर्चसे
वसुप्रदाय
वसवे
वासुदेवाय
उज्ज्वलाय
उग्ररूपाय

ओं ऊर्ध्वगाय नमः
विवस्वते
उद्यत्किरणजालाय ३०
हृषीकेशाय
ऊर्जस्वलाय
वीराय
निर्जराय
जयाय
ऊरुद्वयाभावरूपयुक्तसारथये

ओं ऋषिवन्द्याय नमः
रुग्घन्त्रे
ऋक्षचक्रचराय
ऋजुस्वभावचित्ताय ४०
नित्यस्तुत्याय
ऋकारमातृकावर्णरूपाय
उज्ज्वलतेजसे
ऋक्षाधिनाथमित्राय
पुष्कराक्षाय
लुप्तदन्ताय

ओं शान्ताय नमः
कान्तिदाय
घनाय
कनत्कनकभूषाय ५०
खद्योताय
लूनिताखिलदैत्याय
सत्यानन्दस्वरूपिणे
अपवर्गप्रदाय
आर्तशरण्याय
एकाकिने

ओं भगवते नमः
सृष्टिस्थित्यन्तकारिणे
गुणात्मने
घृणिभृते ६०
बृहते
ब्रह्मणे
ऐश्वर्यदाय
शर्वाय
हरिदश्वाय

ओं शौरये नमः
दशदिक्सम्प्रकाशाय
भक्तवश्याय
ओजस्कराय
जयिने ७०
जगदानन्दहेतवे
जन्ममृत्युजराव्याधिवर्जिताय
उच्चस्थानसमारूढरथस्थाय
असुरारये

ओं कमनीयकराय नमः
अब्जवल्लभाय
अन्तर्बहिःप्रकाशाय
अचिन्त्याय
आत्मरूपिणे
अच्युताय ८०
अमरेशाय
परस्मैज्योतिषे
अहस्कराय
रवये

ओं हरये नमः
परमात्मने
तरुणाय
वरेण्याय
ग्रहाणां पतये
भास्कराय ९०
आदिमध्यान्तरहिताय
सौख्यप्रदाय
सकलजगतां पतये नमः
सूर्याय

ओं कवये नमः

नारायणाय

परेशाय

तेजोरूपाय

श्रीं हिरण्यगर्भाय

ह्रीं सम्पत्कराय १००

ऐं इष्टार्थदाय नमः

अनुप्रसन्नाय

ओं श्रीमते नमः

श्रेयसे

भक्तकोटिसौख्यप्रदायिने

निखिलागमवेद्याय

नित्यानन्दाय

छाया उषादेवीसमेत श्री

सूर्यनारायणस्वामिने नमः

१०८

इति सूर्याष्टोत्तरशतनामावलिस्समाप्ता ॥

चन्द्रयन्त्रम् ४५

८	३	२	९	५	४	७	१	६
७	१	६	८	३	२	९	५	४
९	५	४	७	१	६	८	३	२
१	६	७	५	४	९	३	२	८
५	४	९	३	२	८	१	६	७
३	२	८	१	३	७	५	४	९
२	८	३	४	९	५	६	७	१
६	७	१	२	८	३	४	९	५
४	९	६	५	७	१	२	८	३

॥ अथ चन्द्रमन्त्रः ॥

अस्य श्रीसोममहामन्त्रस्य गौतम ऋषिः ॥ गायत्री छन्दः ॥ सोमो देवता ॥ सां बीजं ॥ सीं शक्तिः ॥ सूं कीलकं ॥ सोमग्रह-प्रसादसिद्ध्यर्थे जपे विनियोगः ॥ सोमाय अङ्गुष्ठाभ्यां नमः ॥ निशाकराय तर्जनीभ्यां स्वाहा ॥ क्षीरोदार्णवसम्भवाय मध्यमाभ्यां वषट् ॥ लक्ष्मीसहोदराय अनामिकाभ्यां हुम् ॥ तारकेशाय कनिष्ठिकाभ्यां वौषट् ॥ सुधामूर्तये करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिन्यासः ॥भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥ गदाधरधरं देवं श्वेतवर्णं निशाकरम् । ध्यायेदमृतसम्भूतं सर्वकामफलप्रदम् ॥ लभे

त्यादि पञ्चपूजा ॥ मूलमन्त्रः ॥ आप्यायस्व समेतु ते विश्वतस्सोम-
वृष्णियं । भवावाजस्य सङ्गथे ॥ इति मन्त्रः ॥

॥ चन्द्रकवचः ॥

अस्य श्रीचन्द्रकवचस्तोत्रमहामन्त्रस्य गौतमऋषिः गायत्री छन्दः ॥ सोमो देवता ॥ रं बीजम् सं शक्तिः ॥ ओं कीलकम् ॥ मम सोमग्रहप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ वां अङ्गुष्ठाभ्यां नमः ॥ वीं तर्जनीभ्यां नमः ॥ वूं मध्यमाभ्यां नमः ॥ वैं अनामिकाभ्यां नमः ॥ वौं कनिष्ठिकाभ्यां नमः ॥ वः करतलकरपृष्ठाभ्यां नमः ॥

एवं हृदयादिन्यासः ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥
सोमं द्विभुजपद्मं च शुक्लाम्बरधरं शुभम् । श्वेतगन्धानुलेपं च मुक्ता-
भरणभूषणम् ॥ श्वेताश्वरथमारूढं मेरुं चैव प्रदक्षिणम् । सोमं चतु-
र्भुजं देवं केयूरमकुटोज्ज्वलम् ॥ वासुदेवस्य नयनं शङ्करस्य च भूष-
णम् । एवं ध्यात्वा जपेन्नित्यं चन्द्रस्य कवचं मुदा ॥ शशी पातु
शिरोदेशे फलं पातु कलानिधिः । चक्षुषी चन्द्रमाः पातु श्रुती पातु
कलात्मजः ॥ घ्राणं पक्षकरः पातु मुखं कुमुदबान्धवः । सोमः

करौ तु मे पातु स्कन्धौ पातु सुधात्मकः ॥ ऊरू मैत्रीनिधिः पातु

मध्यं पातु निशाकरः । कटिं सुधाकरः पातु उरः पातु शशन्धरः ।
मृगाङ्को जानुनी पातु जङ्घे पात्वमृताब्धिजः । पादौ हिमकरः पातु
पातु चन्द्रोऽखिलं वपुः ॥ एतद्धि कवचं पुण्यं भुक्तिमुक्तिप्रदायकम् ।
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ।

इति श्रीब्रह्मवैवर्ते महापुराणे दक्षिणखण्डे चन्द्रकवचस्सम्पूर्णः ॥

॥ चन्द्रस्तोत्रम् ॥

अस्य श्रीचन्द्रस्तोत्रमहामन्त्रस्य गौतमऋषिः ॥ चन्द्रो देवता ॥
अनुष्टुप्छन्दः ॥ चन्द्रग्रहप्रसादसिद्ध्यर्थं जपे विनियोगः ॥ शशिमिति

हृदयादिन्यासः ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥
श्वेताम्बरान्वितवपुं वरशुभ्रवर्णं श्वेताश्वयुक्तरथगं सुरसेविताङ्घ्रिम् ।
दोर्भ्यां धृताभयगदं वरदं सुधांशुं श्रीवत्समौक्तिकधरं प्रणमामि
चन्द्रम् ॥ आग्नेयभागे सरथो दशाश्वश्चात्रेयजो यामुनदेशगश्च ।
प्रत्यङ्मुखस्थश्चतुरश्रपीठे गदाधराङ्गे वररोहिणीशः ॥ चन्द्रं चतुर्भुजं
देवं केयूरमकुटोज्ज्वलम् । वासुदेवस्य नयनं शङ्करस्य च भूषणम् ॥
चन्द्रं द्विभुजं देवं श्वेतवस्त्रधरं विभुम् । श्वेतमाल्याम्बरधरं श्वेत
गन्धानुलेपनम् ॥ श्वेतच्छत्रधरं देवं सर्वाभरणभूषितम् । एतत् स्तोत्रं

पठित्वा तु सर्वसम्पत्करं शुभम् ॥ क्षयापस्मारकुष्ठादितापज्वरनिवा-
रणम् । इदं निशाकरस्तोत्रं यः पठेत्सततं नरः । उपद्रवात्प्रमुच्येत
नात्र कार्या विचारणा ॥

इति श्रीब्रह्माण्डपुराणे उमामहेश्वरसंवादे दक्षिणखण्डे
चन्द्रस्तोत्रं सम्पूर्णम् ॥

॥ चन्द्राष्टोत्तरशतनामस्तोत्रम् ॥

श्रीमान् शशधरश्चन्द्रो ताराधीशो निशाकरः ।
सुधानिधिस्सदाराध्यस्सत्पतिस्साधुपूजितः ॥ १
जितेन्द्रियो जयोद्योगः ज्योतिश्चक्रप्रवर्तकः ।

विकर्तनानुजो वीरो विश्वेशो विदुषां पतिः ॥ २
दोषाकरो दुष्टदूरः पुष्टिमान् शिष्टपालकः ।
अष्टमूर्तिप्रियोऽनन्तकष्टदारुकुठारकः ॥ ३
स्वप्रकाशः प्रकाशात्मा द्युचरो देवभोजनः ।
कलाधरः कलाहेतुः कामकृत्कामदायकः ॥ ४
मृत्युसंहारकोऽमर्त्यो नित्यानुष्ठानदायकः ।
क्षपाकरः क्षीणपापः क्षयवृद्धिसमन्वितः ॥ ५

जैवातृकश्शुचिश्शुभ्रो जयी जयफलप्रदः ।

सुधामयस्सुरस्वामी भक्तानामिष्टदायकः ॥ ६
भुक्तिदो मुक्तिदो भद्रो भक्तदारिद्र्यभञ्जकः ।
सामगानप्रियस्सर्वरक्षकस्सागरोद्भवः ॥ ७
भयान्तकृद्भक्तिगम्यो भवबन्धविमोचकः ।
जगत्प्रकाशकिरणो जगदानन्दकारणः ॥ ८
निस्सपत्नो निराहारो निर्विकारो निरामयः ।
भूच्छायाच्छादितो भव्यो भुवनप्रतिपालकः ॥ ९
सकलार्तिहरस्सौम्यजनकस्साधुवन्दितः ।
सर्वागमज्ञस्सर्वज्ञो सनकादिमुनिस्तुतः ॥ १०

सितच्छत्रध्वजोपेतस्सिताङ्गस्सितभूषणः ।
श्वेतमाल्याम्बरधरश्श्वेतगन्धानुलेपनः ॥ ११
दशाश्वरथसंरूढो दण्डपाणिर्धनुर्धरः ।
कुन्दपुष्पोज्ज्वलाकारो नयनाब्जसमुद्भवः ॥ १२
आत्रेयगोत्रजोऽत्यन्तविनयः प्रियदायकः ।
करुणारससम्पूर्णः कर्कटप्रभुरव्ययः ॥ १३
चतुरश्रासनारूढश्चतुरो दिव्यवाहनः ।
विवस्वन्मण्डलाज्ञेयवासो वसुसमृद्धिदः ॥ १४

[illegible]

महेश्वरप्रियो दान्तः मेरुगोत्रप्रदक्षिणः ।
ग्रहमण्डलमध्यस्थो ग्रसितार्को ग्रहाधिपः ॥ १४
द्विजराजो द्युतिकरो द्विभुजो द्विजपूजितः ।
औदुम्बरनगावास उदारो रोहिणीपतिः ॥ १५
नित्योदयो मुनिस्तुत्यो नित्यानन्दफलप्रदः ।
सकलाह्लादनकरः पलाशसमिधप्रियः ॥ १६
एवं नक्षत्रनाथस्य नाम्नामष्टोत्तरं शतम् ॥

॥ चन्द्राष्टोत्तरशतनामावलिः ॥

ओं श्रीमते नमः
शशधराय
चन्द्राय
ताराधीशाय
निशाकराय
सुधानिधये
सदाराध्याय
सत्पतये
साधुपूजिताय

ओं जितेन्द्रियाय नमः १०
जयोद्योगाय
ज्योतिश्चक्रप्रवर्तकाय
विकर्तनानुजाय
वीराय
विश्वेशाय
विदुषांपतये
दोषाकराय
दुष्टदूराय

ॐ पुष्टिमते नमः

शिष्टपालकाय २०

अष्टमूर्तिप्रियाय

अनन्ताय

कष्टदारुकुठारकाय

स्वप्रकाशाय

प्रकाशात्मने

द्युचराय

देवभोजनाय

कळाधराय

ॐ कालहेतवे नमः

कामकृते ३०

कामदायकाय

मृत्युसंहारकाय

अमर्त्याय

नित्यानुष्ठानदाय

क्षपाकराय

क्षीणपापाय

क्षयवृद्धिसमन्विताय

जैवातृकाय

ओं शुचये नमः
शुभ्राय ४०
जयिने
जयफलप्रदाय
सुधामयाय
सुरस्वामिने
भक्तानामिष्टदायकाय
भुक्तिदाय (मुक्तिदाय)
भद्राय

ओं भक्तदारिद्र्यभञ्जनाय नमः
सामगानप्रियाय
सर्वरक्षकाय ५०
सागरोद्भवाय
भयान्तकृते
भक्तिगम्याय
भवबन्धविमोचकाय
जगत्प्रकाशकिरणाय
जगदानन्दकारणाय

ओं निस्सपत्नाय नमः
निराहाराय
निर्विकाराय
निरामयाय ६०
भूच्छायाच्छादिताय
भव्याय
भुवनप्रतिपालकाय
सकलार्तिहराय
सौम्यजनकाय
साधुवन्दिताय

ओं सर्वागमज्ञाय नमः
सर्वज्ञाय
सनकादिमुनिस्तुताय
सितच्छत्रध्वजोपेताय ७०
सिताङ्गाय
सितभूषणाय
श्वेतमाल्याम्बरधराय
श्वेतगन्धानुलेपनाय
दशाश्वरथसंरूढाय
दण्डपाणये

ओँ धनुर्धराय नमः
कुन्दपुष्पोज्ज्वलाकाराय
नयनाब्जसमुद्भवाय
आत्रेयगोत्रजाय ८०
अत्यन्तविनयाय
प्रियदायकाय
करुणारससम्पूर्णाय
कर्कटप्रभवे
अव्ययाय

ओँ चतुरश्रासनारूढाय नमः
चतुराय
दिव्यवाहनाय
विवस्वन्मण्डलाज्ञेयवासाय
वसुसमृद्धिदाय ९०
महेश्वरप्रियाय
दान्ताय
मेरुगोत्रप्रदक्षिणाय
ग्रहमण्डलमध्यस्थाय

ओं असिताकाय नमः
द्विजराजाय
द्युतिलकाय
द्विभुजाय
द्विजपूजिताय
औदुम्बरनगावासाय १००
उदाराय

ओं रोहिणीपतये नमः
नित्योदयाय
मुनिस्तुत्याय
नित्यानन्दफलप्रदाय
सकलाह्लादनकराय
पलाशसमिधप्रियाय
श्रीचन्द्रमसे १०८

चन्द्राष्टोत्तरशतनामावळिस्सम्पूर्णा ॥

॥ अङ्गारकयन्त्रम् ४५ ॥

६	४	५	३	१	२	९	७	८
९	७	८	६	४	५	३	१	२
३	१	२	९	७	८	६	४	५
५	६	४	८	९	७	२	३	१
८	९	७	२	३	१	५	६	४
२	३	१	५	६	४	८	९	७
७	८	९	४	५	६	१	२	३
१	२	३	७	८	९	४	५	६
४	५	६	१	२	३	७	८	९

॥ अङ्गारकमन्त्रः ॥

ओम् अस्य श्री अङ्गारकमहामन्त्रस्य विरूपाक्ष ऋषिः ॥ गायत्री-छन्दः ॥ अङ्गारको देवता ॥ मम अङ्गारकग्रहप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ अङ्गारकाय अङ्गुष्ठाभ्यां नमः ॥ धरणीसुताय तर्जनीभ्यां स्वाहा ॥ रक्तवाससे मध्यमाभ्यां वषट् ॥ रक्तलोचनाय अनामिकाभ्यां हुम् ॥ शक्तिधराय कनिष्ठिकाभ्यां वौषट् । कर्मभावनाय करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिन्यासः ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम्—रक्तमाल्याम्बरधरं हेमरूपं चतुर्भुजम् । शक्तिशूलगदापद्मान् धारयन्तं कराम्बुजैः ॥ लमित्यादि पञ्चपूजा ॥ मूलमन्त्रः ॥ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं । अपाꣳ रेताꣳसि जिन्वति ॥ इति मन्त्रः ॥

॥ अङ्गारककवचः ॥

ओम् ॥ अस्य श्री अङ्गारककवचस्तोत्रमहामन्त्रस्य विरूपाक्ष ऋषिः ॥ गायत्री छन्दः ॥ अङ्गारको देवता ॥ अं बीजं ॥ गं शक्तिः ॥ रं कीलकम् ॥ मम अङ्गारकग्रहप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ आं अङ्गुष्ठाभ्यां नमः ॥ ईं तर्जनीभ्यां नमः ॥ ऊं मध्यमाभ्यां नमः ॥ ऐं अनामिकाभ्यां नमः ॥ औं कनिष्ठिकाभ्यां नमः ॥ अः करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादिन्यासः ॥ भूर्भुवस्सुवरो-मिति दिग्बन्धः ॥ ध्यानम् ॥ नमाम्यङ्गारकं देवं रक्ताङ्गं वरभूषणम् । जानुस्थं वामहस्ताभ्यां चापेषुवरपाणिनम् ॥ चतुर्भुजं मेषवाहं वरदं

चावनीसुतम् । शक्तिशूलगदाखड्गं ज्वालापुञ्जोर्ध्वकेशकम् ॥ मेरुं प्रदक्षिणं कृत्वा सर्वदेवात्मसिद्धिदम् । अङ्गारकश्शिरो रक्षेत् मुखं वै धरणीसुतः ॥ कर्णौ रक्ताम्बरः पातु नेत्रे मे रक्तलोचनः । नासिकां मे शक्तिधरः कण्ठं मे पातु भौमकः ॥ भुजौ तु रक्तमाली च हस्तं-शूलधरस्तथा । चतुर्भुजो मे हृदयं कुक्षिं रोगापहारकः ॥ कटिं मे भूमिजः पातु ऊरू पातु गदाधरः । जानुजङ्घे कुजः पातु पादौ भौमस्सदा मम ॥ सर्वाणि यानि चाङ्गानि रक्षेन्मे मेषवाहनः । य इदं कवचं दिव्यं सर्वशत्रुविनाशनम् ॥ भूतप्रेतपिशाचानां नाशनं सर्वसिद्धिदम् । सर्वरोगहरं चैव सर्वसम्पत्प्रदं शुभम् ॥ भुक्तिमुक्तिप्रदं

नृणां सर्वसौभाग्यवर्धनम् । ऋणबन्धविमोक्षं च सत्यमेव न संशयः ॥ स्तोत्रपाठस्तु कर्तव्यो देवस्याग्रे समाहितः । रक्तगन्धाक्षतैः पुष्पैर्धूपदीपगुडोदनैः ॥ मङ्गळं पूजयित्वा तु मङ्गळेऽहनि सर्वदा । ब्राह्मणान्भोजयेत्पश्चाच्चतुरो द्वादशाथवा ॥ अनेन विधिना यस्तु कृत्वा व्रतमनुत्तमम् । व्रतं तदेव कुर्वीत सप्तवारेषु वा यदि ॥ तेषां शस्त्राण्युत्पलानि वह्निस्स्याच्चन्द्रशीतलः । नचैनं व्याधयन्त्यस्मान्मृगपक्षिगजादयः ॥ महान्धतमसे प्राप्ते मार्ताण्डस्योदयादिव । विलयं यान्ति पापानि शतजन्मार्जितानि वै ॥

इति अङ्गारककवचस्सम्पूर्णः ॥

प्रणा ॥ अङ्गारकस्तोत्रम् ॥ कलौ

ऋणग्रस्तस्य ऋणविमोचनार्थं अङ्गारकस्तोत्रमन्त्रः ॥ स्कन्द उवाच ॥ ऋणग्रस्तनराणां तु ऋणमुक्तिः कथं भवेत् ॥ ब्रह्मोवाच ॥ वक्ष्येऽहं सर्वलोकानां हितार्थं हितकामदम् ॥ श्री अङ्गारकस्तोत्रमहा-मन्त्रस्य गौतमऋषिः ॥अनुष्टुप्छन्दः ॥ अङ्गारको देवता ॥ मम ऋण-विमोचनार्थे जपे विनियोगः ॥ ध्यानम् ॥ रक्तमाल्याम्बरधरः शूल-शक्तिगदाधरः । चतुर्भुजो मेषगतो वरदश्च धरासुतः ॥ मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः । स्थिरासनो महाकायो सर्वकामफल-प्रदः ॥ लोहितो लोहिताक्षश्च सामगानां कृपाकरः । धरात्मजः

कुजो भौमो भूमिदो भूमिनन्दनः ॥ अङ्गारको यमश्चैव सर्वरोगापहारकः । दृष्टेः कर्ता च हर्ता च सर्वदेवैश्च पूजितः ॥ एतानि कुजनामानि नित्यं यः प्रयतः पठेत् । ऋणं न जायते तस्य धनं प्राप्नोत्यसंशयः ॥ अङ्गारक महीपुत्र भगवन् भक्तवत्सल । नमोऽस्तु ते ममाशेष ऋणमाशु विनाशय ॥ रक्तगन्धैश्च पुष्पैश्च धूपदीपैर्गुडोदनैः । मङ्गलं पूजयित्वा तु मङ्गलाहनि सर्वदा ॥ एकविंशतिनामानि पठित्वा तु तदन्तिके । ऋणरेखा प्रकर्तव्या अङ्गारेण तदग्रतः ॥ ताश्च प्रमार्जयेत्पश्चात् वामपादेन संस्पृशन् ॥ मूलमन्त्रः ॥ अङ्गारक

महीपुत्र भगवन् भक्तवत्सल । नमोऽस्तु ते ममाशेषऋणमाशु विमोचय ॥ एवं कृते न सन्देहो ऋणं हित्वा धनी भवेत् । महतीं श्रियमाप्नोति ह्यपरो धनदो युवा ॥ अर्घ्यं ॥ अङ्गारक महीपुत्र भगवन् भक्तवत्सल । नमोऽस्तु ते ममाशेष ऋणमाशु विमोचय ॥ भूमिपुत्र महातेजस्स्वेदोद्भव पिनाकिनः । ऋणार्तस्त्वां प्रपन्नोऽस्मि गृहाणार्घ्यं नमोऽस्तु ते ॥

इति अङ्गारकस्तोत्रं सम्पूर्णम् ॥

॥ अङ्गारकाष्टोत्तरशतनामस्तोत्रम् ॥

महीसुतो महाभागो मङ्गलो मङ्गलप्रदः ।
महावीरो महाशूरो महाबलपराक्रमः ॥ १

महारौद्रो महाभद्रो माननीयो दयाकरः ।
मानदोऽमर्षणः क्रूरस्तापपापविवर्जितः ॥ २

सुप्रतीपस्सुताम्राक्षः सुब्रह्मण्यस्सुखप्रदः ।
वक्रस्तम्भादिगमनो वरेण्यो वरदस्सुखी ॥ ३

वीरभद्रो विरूपाक्षः विदूरस्थो विभावसुः ।
नक्षत्रचक्रसञ्चारी क्षत्रपः क्षात्रवर्जितः ॥ ४

क्षयवृद्धिविनिर्मुक्तः क्षमायुक्तो विचक्षणः ।
अक्षीणफलदश्चक्षुर्गोचरश्शुभलक्षणः ॥ ५

वीतरागो वीतभयो विज्वरो विश्वकारणः ।
नक्षत्रराशिसञ्चारो नानाभयनिकृन्तनः ॥ ६

कमनीयो दयासारः कनत्कनकभूषणः ।
भयघ्नो भव्यफलदो भक्ताभयवरप्रदः ॥ ७

शत्रुहन्ता शमोपेतः शरणागतपोषकः ।
साहसी सद्गुणाध्यक्षस्साधुस्समरदुर्जयः ॥ ८

दुष्टदूरहितापूज्यस्सर्वकष्टनिवारकः ।

दुश्चेष्टावारको दुःखभञ्जनो दुर्धरो हरिः ॥ ९
दुस्स्वप्नहन्ता दुर्धर्षो दुष्टगर्वविमोचकः ।
भरद्वाजकुलोद्भूतो भूसुतो भव्यभूषणः ॥ १०
रक्ताम्बरो रक्तवपुर्भक्तपालनतत्परः ।
चतुर्भुजो गदाधारी मेषवाहोऽमिताशनः ॥ ११
शक्तिशूलधरश्शक्तश्शस्त्रविद्याविशारदः ।
तार्किकस्तामसाधारस्तपस्वी ताम्रलोचनः ॥ १२
तप्तकाञ्चनसङ्काशो रक्तकिञ्जल्कसन्निभः ।

गोत्राधिदेवो गोमध्यचरो गुणविभूषणः ॥ १३

असृगङ्गारकोऽवन्तिदेवाधीशो जनार्दनः ।
सूर्ययाम्यप्रदेशस्थो यौवनो याम्यदिङ्मुखः ॥ १४

त्रिकोणमण्डलगतस्त्रिदशाधिपसन्नुतः ।
शुचिश्शुचिकरश्शूरो शुचिवश्यश्शुभावहः ॥ १५

मेषवृश्चिकराशीशो मेधावी मितभाषणः ।
सुखप्रदस्सुरूपाक्षस्सर्वाभीष्टफलप्रदः ॥ १६

अङ्गारकग्रहस्यैवं नाम्नामष्टोत्तरं शतम् ॥

इति अङ्गारकाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

॥ अङ्गारकाष्टोत्तरशतनामावळिः ॥

ओं महीसुताय नमः
महाभागाय
मङ्गलाय
मङ्गलप्रदाय
महावीराय
महाशूराय
महाबलपराक्रमाय
महारौद्राय
महाभद्राय

ओं माननीयाय नमः १०
दयाकराय
मानदाय
अमर्षणाय
क्रूराय
तापपापविवर्जिताय
सुप्रतीपाय
सुताम्राक्षाय
सुब्रह्मण्याय

ॐ सुखप्रदाय नमः

वक्रस्तम्भादिगमनाय २०
वरेण्याय
वरदाय
सुखिने
वीरभद्राय
विरूपाक्षाय
विदूरस्थाय
विभावसवे
नक्षत्रचक्रसञ्चारिणे

ॐ क्षत्तृरूपाय नमः

क्षात्त्रवर्जिताय ३०
क्षयवृद्धिविनिर्मुक्ताय
क्षमायुक्ताय
विचक्षणाय
अक्षीणफलदाय
चक्षुर्गोचराय
शुभलक्षणाय
वीतरागाय
वीतभयाय

ओं विज्वराय नमः
विश्वकारणाय ४०
नक्षत्रराशिसञ्चाराय
नानाभयनिकृन्तनाय
कमनीयाय
दयासाराय
कनत्कनकभूषणाय
भयघ्नाय
भव्यफलदाय

ओं भक्ताभयवरप्रदाय नमः
शत्रुहन्त्रे
शमोपेताय ५०
शरणागतपोषणाय नमः
साहसिने
सद्गुणाध्यक्षाय
साधवे
समरदुर्जयाय
दुष्टदूराय

ओं शिष्टपूज्याय नमः
सर्वकष्टनिवारकाय
दुश्चेष्टावारकाय
दुःखभञ्जनाय ६०
दुर्धर्षाय
हरये
दुस्स्वप्नहन्त्रे
दुर्धर्षाय
दुष्टगर्वविमोचनाय
भरद्वाजकुलोद्भूताय

ओं भूसुताय नमः
भव्यभूषणाय
रक्ताम्बराय
रक्तवपुषे ७०
भक्तपालनतत्पराय
चतुर्भुजाय
गदाधारिणे
मेषवाहाय
अमिताशनाय
शक्तिशूलधराय

ओँ शक्ताय नमः
शस्त्रविद्याविशारदाय
तार्किकाय
तामसाधाराय ८०
तपस्विने
ताम्रलोचनाय
तप्तकाञ्चनसङ्काशाय
रक्तकिञ्जल्कसन्निभाय
गोत्राधिदेवाय

ओँ गोमध्यचराय
गुणविभूषणाय
असृजे
अङ्गारकाय
अवन्तिदेशाधीशाय ९०
जनार्दनाय
सूर्ययाम्यप्रदेशस्थाय
यौवनाय
याम्यदिङ्मुखाय

ओं त्रिकोणमण्डलगताय नमः
त्रिदशाधिपसन्नुताय
शुचये
शुचिकराय
शूराय
शुचिवश्याय १००
शुभावहाय

ओं मेषवृश्चिकराशीशाय नमः
मेधाविने
मितभाषणाय
सुखप्रदाय
सुरूपाक्षाय
सर्वाभीष्टफलप्रदाय
श्रीमते अङ्गारकाय नमः

इति अङ्गारकाष्टोत्तरशतनामावलिस्सम्पूर्णा ॥

॥ बुधयन्त्रम् ४५ ॥

७	८	९	१	२	३	४	५	६
४	५	६	७	८	९	१	२	३
१	२	३	४	५	६	७	८	९
६	४	५	९	७	८	३	१	२
३	१	२	६	४	५	९	७	८
९	७	८	३	१	२	६	४	५
२	३	१	५	६	४	८	९	७
८	९	७	२	३	१	५	६	४
५	६	४	८	९	७	२	३	१

॥ बुधमन्त्रः ॥

अस्य श्री बुधमहामन्त्रस्य काश्यप ऋषिः ॥ त्रिष्टुप्छन्दः ॥ बुधो देवता ॥ बुधग्रहप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ बुधाय अङ्गुष्ठाभ्यां नमः ॥ सौम्याय तर्जनीभ्यां स्वाहा ॥ सिंहारूढाय मध्यमाभ्यां वषट् ॥ चतुर्बाहवे अनामिकाभ्यां हुम् ॥ गदाधराय कनिष्ठिकाभ्यां वौषट् ॥ सोमपुत्राय करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिन्यासः ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥ सिंहारूढं चतुर्बाहुं खड्गचर्मगदाधरम् । सोमपुत्रं महासौम्यं ध्यायेत्सर्वार्थसिद्धिदम् ॥ लमित्यादि पञ्चपूजा ॥ उद्बुध्यस्वाग्ने प्रतिजागृह्येन

मिष्टापूर्ते सगं सृजेथामयं च पुनः कृण्वग्ंस्त्वा पितरं युवान मन्वा-स्वाग्ंसी त्वयि तं तु मेतम् ॥ इति मन्त्रः ॥

॥ बुधकवचः ॥

ओम् अस्य श्रीबुधकवचस्तोत्रमहामन्त्रस्य ॥ कात्यायन ऋषिः ॥ अनुष्टुप्छन्दः ॥ बुधो देवता ॥ यं बीजम् ॥ क्लीं शक्तिः ॥ ऊं कीलकम् ॥ मम बुधग्रहप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ वां अङ्गुष्ठाभ्यां नमः ॥ वीं तर्जनीभ्यां नमः ॥ वूं मध्यमाभ्यां नमः ॥ वैं अनामिकाभ्यां नमः॥ वौं कनिष्ठिकाभ्यां नमः॥ वः करतलकरपृष्ठाभ्यां

नम ः।। एवं हृदयादिन्यासः ।। भूर्भुवस्सुवरोमिति दिग्बन्धः ।। ध्यानम् ।। बुधःपुस्तकहस्तश्च कुङ्कुमस्य समद्युतिः । बुधं ज्ञानमयं सर्वं कुङ्कुमाभं चतुर्भुजम् ।। खड्गशूलगदापाणिं वरदाङ्कितमुद्रितम् ।। पीताम्बरधरं देवं पीतमाल्यानुलेपनम् ।वज्राद्याभरणं चैव किरीटमकुटोज्ज्वलम् ।। श्वेताश्व-रथमारूढं मेरुं चैव प्रदक्षिणम् ।। बुधः पुस्तकहस्तश्च कुङ्कुमस्य सम-द्युतिः ।। पीताम्बरधरः पातु पीतमाल्यानुलेपनः । बुधः पातु शिरो-देशं सौम्यः पातु च फालकम् ।। नेत्रे ज्ञानमयः पातु श्रुती पातु शशिस्तुतः । घ्राणं गन्धधरः पातु भुजौ पुस्तकभूषितः ।। मध्यं पातु सुराराध्यः पातु नाभिं खगेश्वरः । कटिं कालात्मकः पातु ऊरू पातु

सुरेश्वरः ॥ जानुनी रोहिणीसूनुः पातु जङ्घे फलप्रदः । पादौ बाणासनः पातु पातु सौम्योऽखिलं वपुः ॥ एषोऽपि कवचः पुण्यः सर्वोपद्रवशान्तिदः । सर्वरोगप्रशमनः सर्वदुःखनिवारकः ॥ आयुरारोग्यशुभदः पुत्रपौत्रप्रवर्धनम् । यः पठेत्कवचं दिव्यं शृणुयाद्वा समाहितः । सर्वान्कामानवाप्नोति दीर्घमायुश्च विन्दति ॥

इति श्रीस्कान्दे पुराणे उत्तरखण्डे बुधकवचस्समाप्तः ॥

॥ बुधग्रहस्तोत्रम् ॥

अस्य श्रीबुधस्तोत्रमहामन्त्रस्य वसिष्ठ ऋषिः ॥ त्रिष्टुप्छन्दः ॥ श्रीबुधो देवता ॥ बुधग्रहप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ बामित्यादि षडङ्गन्यासः ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥ बुधश्चतुर्भि-र्वरदाभयासिगदा वहन्तं वरदं प्रशान्तम् । पीतप्रभं चन्द्रसुतं सुराद्यं सिंहे निषण्णं बुधमाश्रयामि ॥ पीताम्बरः पीतवपुः किरीटी च चतुर्भुजः । पीतध्वजपताकी च रोहिणीगर्भसम्भवः ॥ ईशान्यादिषु देशेषु बाणासन उदङ्मुखः । नाथो मगधदेशस्य मन्त्रो मन्त्रार्थ-तत्त्ववित् ॥ सुखासनः कर्णिकारो जैत्रश्चात्रेयगोत्रवान् । भारद्वाज-

ऋषिप्रख्यैर्ज्योतिर्मण्डलमण्डितः ॥ अधिप्रत्यधिदेवाभ्या मन्यतो ग्रहमण्डले । प्रविष्टस्सूक्ष्मरूपेण समस्तवरदस्सुखी ॥ सदा प्रदक्षिणं मेरोः कुर्वाणः कामरूपवान् । असिदण्डौ च बिभ्राणः सम्प्राप्तसुफल-प्रदः ॥ कन्यायामिथुनस्यापि राशेरधिपतिर्द्वयोः । मुद्गधान्यप्रदो नित्यं मर्त्यामर्त्यसुरार्चितः ॥ यस्तु सौम्येन मनसा स्वमात्मानं प्रपूजयेत् । तस्य वश्यो भवेन्नित्यं सौम्यनामधरो बुधः ॥ बुधस्तोत्रमिदं गुह्यं वसिष्ठेनोदितं पुरा । दिलीपाय च भक्ताय याचमानाय भूभृते ॥ यः पठेदेकवारं वा सर्वाभीष्टमवाप्नुयात् । स्तोत्रराजमिदं पुण्यं गुह्याद्गुह्य-

तमं महत् । एकवारं द्विवारं वा त्रिवारं यः पठेन्नरः । तस्यापस्मार-कुष्ठादिव्याधिबाधा न विद्यते ॥ सर्वग्रहकृता पीडा पठितेऽस्मिन्न विद्यते । कृत्रिमौषधदुर्मन्त्रं कृत्रिमादिनिशाचरैः ॥ यद्यद्भयं भवेत्तत्र पठितेऽस्मिन् न विद्यते । प्रतिमा या च स्वर्णेन लिखिता तु भुजाष्टका ॥ मुद्गधान्योपरि न्यस्तपीतवस्त्रान्विते घटे । विन्यस्य विधिना सम्यक् मासमेकं निरन्तरम् ॥ ये पूजयन्ति ते यान्ति दीर्घमायुः प्रजा धनम् । आरोग्यं भस्मगुल्मादिसर्वव्याधिविनाशनम् ॥ यं यं कामयते सम्यक् तत्तदाप्नोत्यसंशयः ॥

इति श्रीस्कान्दे पुराणे बुधस्तोत्रं सम्पूर्णम् ॥

॥ बुधाष्टोत्तरशतनामस्तोत्रम् ॥

बुधो बुधार्चितस्सौम्यो सौम्यचित्तश्शुभप्रदः ।
दृढव्रतो दृढफलश्श्रुतिजालप्रबाधकः ॥ १

सत्यवासस्सत्यवचाः श्रेयसां पतिरव्ययः ।
सोमजस्सुखदश्श्रीमान् सोमवंशप्रदीपकः ॥ २

वेदविद्वेदतत्त्वज्ञो वेदान्तज्ञानभास्वरः ।
विद्याविचक्षणविभुर्विद्वत्प्रीतिकरो ऋजुः ॥ ३

विश्वानुकूलसञ्चारी विशेषविनयान्वितः ।
विविधागमसारज्ञो वीर्यवद्विगतज्वरः ॥ ४

त्रिवर्गफलदोऽनन्तस्त्रिदशाधिपपूजितः ।
बुद्धिमद्बहुशास्त्रज्ञो बली बन्धविमोचकः ॥ ५

वक्रातिवक्रगमनो वासवो वसुधाधिपः ।
प्रसादवदनो वन्द्यो वरेण्यो वाग्विलक्षणः ॥ ६

सत्यवान् सत्यसङ्कल्पस्सत्यबन्धुस्सदादरः ।
सर्वरोगप्रशमनस्सर्वमृत्युनिवारकः ॥ ७

वाणिज्यनिपुणो वश्यो वाताङ्गी वातरोगहृत् ।
स्थूलस्स्थैर्यगुणाध्यक्षः स्थूलसूक्ष्मादिकारणः ॥ ८

अप्रकाशः प्रकाशात्मा घनो गगनभूषणः ।

विधिपूज्यो विशालाक्षो विद्वज्जनमनोहरः ॥ ९
चारुशीलः स्वप्रकाशश्चपलश्च जितेन्द्रियः ।
उदङ्मुखो मुखासक्तो मगधाधिपतिर्हरः ॥ १०
सौम्यवत्सरसञ्जातस्सोमप्रियकरस्सुखी ।
सिंहाधिरूढस्सर्वज्ञश्शिखिवर्णश्शिवङ्करः ॥ ११
पीताम्बरः पीतवपुः पीतच्छत्रध्वजाङ्कितः ।
खड्गचर्मधरः कार्यकर्ता कलुषहारकः ॥ १२

आत्रेयगोत्रजोऽत्यन्तविनयो विश्वपावनः ।

चाम्पेयपुष्पसङ्काशश्चारणश्चारुभूषणः ॥ १३
वीतरागो वीतभयो विशुद्धकनकप्रभः ।
बन्धुप्रियो बन्धुमुक्तो बाणमण्डलसंश्रितः ॥ १४
अर्केशाननिवासस्थस्तर्कशास्त्रविशारदः ।
प्रशान्तः प्रीतिसंयुक्तः प्रियकृत्प्रियभाषणः ॥ १५
मेधावी माधवासक्तो मिथुनाधिपतिस्सुधीः ।
कन्याराशिप्रियः कामप्रदो घनफलाशयः ॥ १६
बुधस्यैवं प्रकारेण नाम्नामष्टोत्तरं शतम् ॥ १६ ॥

इति बुधाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

॥ बुधाष्टोत्तरशतनामावळिः ॥

ओं बुधाय नमः
बुधार्चिताय
सौम्याय
सौम्यचित्ताय
शुभप्रदाय
दृढव्रताय
दृढफलाय
श्रुतिजालप्रबोधकाय
ओं सत्यवासाय नमः
सत्यवचसे १०
श्रेयसां पतये
अव्ययाय
सोमजाय
सुखदाय
श्रीमते
सोमवंशप्रदीपकाय

ओं वेदविदे नमः
वेदतत्वज्ञाय
वेदान्तज्ञानभास्वराय
विद्याविचक्षणविभवे २०
विद्वत्प्रीतिकराय
ऋजवे
विश्वानुकूलसञ्चारिणे
विशेषविनयान्विताय
विविधागमसारज्ञाय
वीर्यवते

ओं विगतज्वराय नमः
त्रिवर्गफलदाय
अनन्ताय
त्रिदशाधिपपूजिताय ३०
बुद्धिमते
बहुशास्त्रज्ञाय
बलिने
बन्धविमोचनाय
वक्रातिवक्रगमनाय
वासवाय

ओं वसुधाधिपाय नमः
प्रसादवदनाय
वन्द्याय
वरेण्याय ४०
वाग्विलक्षणाय
सत्यवते
सत्यसन्धाय
सत्यसङ्कल्पाय
सदादराय

ओं सर्वरोगप्रशमनाय नमः
सर्वमृत्युनिवारकाय
वाणिज्यनिपुणाय
वश्याय
वाताङ्गिने ५०
वातरोगहृते
स्थूलाय
स्थैर्यगुणाध्यक्षाय
स्थूलसूक्ष्मादिकारणाय

ॐ अप्रकाशाय नमः
प्रकाशात्मने
घनाय
गगनभूषणाय
विधिस्तुत्याय
विशालाक्षाय ६०
विद्वज्जनमनोहराय
चारुशीलाय
स्वप्रकाशाय
चपलाय

ॐ जितेन्द्रियाय नमः
उदङ्मुखाय
मखासक्ताय
मगधाधिपतये
हरये
सौम्यवत्सरसंजाताय ७०
सोमप्रियकराय
सुखिने
सिंहाधिरूढाय
सर्वज्ञाय

ॐ शिखिवर्णाय नमः
शिवङ्कराय
पीताम्बराय
पीतवपुषे
पीतच्छत्रध्वजाङ्किताय
खड्गचर्मधराय ८०
कार्यकर्त्रे
कलुषहारकाय
आत्रेयगोत्रजाय

ॐ अत्यन्तविनयाय नमः
विश्वपावनाय
चाम्पेयपुष्पसङ्काशाय
चारणाय
चारुभूषणाय
वीतरागाय
वीतभयाय ९०
विशुद्धाय
कनकप्रभाय

ओं बन्धुप्रियाय नमः	ओं प्रियभाषणाय नमः
बन्धुमुक्ताय	मेधाविने
बाणमण्डलसंश्रिताय	माधवासक्ताय
अर्केशाननिवासस्थाय	मिथुनाधिपतये
तर्कशास्त्रविशारदाय	सुधिये
प्रशान्ताय	कन्याराशिप्रियाय
प्रीतिसंयुक्ताय	कामप्रदाय
प्रियकृते १००	घनफलाशाय १०८

इति बुधाष्टोत्तरशतनामावलिस्समाप्ता ॥

॥ बृहस्पतियन्त्रम् ४५ ॥

२	१	३	५	४	६	८	७	९
८	७	९	२	१	३	५	४	६
५	४	६	८	७	९	२	१	३
६	५	४	९	८	७	३	२	१
३	२	१	६	५	४	९	८	७
९	८	७	३	२	१	६	५	४
७	९	८	१	३	२	४	६	५
४	६	५	७	९	८	१	३	२
१	३	२	४	६	५	७	९	८

॥ बृहस्पतिमन्त्रः ॥

अस्य श्री बृहस्पतिमहामन्त्रस्य गृत्समदऋषिः ॥ जगतीछन्दः ॥ बृहस्पतिर्देवता ॥ बृहस्पतिप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ गुरवे अङ्गुष्ठाभ्यां नमः ॥ वाक्पतये तर्जनीभ्यां नमः ॥ गीर्वाणवन्दिताय मध्यमाभ्यां नमः ॥ वरदाय अनामिकाभ्यां नमः ॥ सुराचार्याय कनिष्ठिकाभ्यां नमः ॥ कमण्डलुधराय करतलकरपृष्ठाभ्यां नमः ॥ गुरवे हृदयाय नमः ॥ वाक्पतये शिरसे स्वाहा ॥ गीर्वाणवन्दिताय शिखायै वषट् ॥ वरदाय कवचाय हुम् ॥ सुराचार्याय नेत्रत्रयाय वौषट् ॥ कमण्डलुधराय अस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

॥ गुरुमन्त्रः ॥

ध्यानम् ॥ वराक्षमालिकादण्ड कमण्डलुधरं विभुम् । पुष्परागाङ्कितं पीतं वरदं भावयेद्गुरुम् ॥ ऌमित्यादि पञ्चपूजा ॥

लं पृथिव्यात्मने गन्धं समर्पयामि । हं आकाशात्मने पुष्पाणि समर्पयामि । यं वाय्वात्मने धूपमाघ्रापयामि ,। रं वह्न्यात्मने दीपं दर्शयामि । वं अमृतात्मने अमृतोपहारं निवेदयामि । सं सर्वात्मने सर्वोपचारान् समर्पयामि ॥

॥ मूलमन्त्रः ॥

बृहस्पते अतियदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदय-च्छवसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥

(यथाशक्ति जपेत् । गुरवे हृदयाय नम इत्यादि सर्वोपचारान् समर्पयामीत्यन्तं पठेत् । दिग्बन्ध इत्यत्र दिग्विमोक इति विशेषः ॥)

इति बृहस्पतिमन्त्रः ॥

॥ बृहस्पतिकवचम् ॥

अस्य श्रीबृहस्पतिकवचमहामन्त्रस्य । ईश्वर ऋषिः । अनुष्टुप्छन्दः । बृहस्पतिर्देवता । ह्रीं बीजम् । ह्रीं शक्तिः । ह्रू कीलकम् । बृहस्पतिप्रसादसिद्ध्यर्थे जपे विनियोगः । ह्रां अङ्गुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां नमः । ह्रूं मध्यमाभ्यां नमः । ह्रैं अनामिकाभ्यां नमः ।

ह्रौं कनिष्ठिकाभ्यां नमः । ह्रः करतलकरपृष्ठाभ्यां नमः । ह्रां हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रूं शिखायै वषट् । ह्रैं कवचाय हुम् । ह्रौं नेत्रत्रयाय वौषट् । ह्रः अस्त्राय फट् । भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम्——तप्तकाञ्चनवर्णाभं चतुर्भुजसमन्वितम् । दण्डाक्षमालिका-हस्तं कमण्डलुवरान्वितम् ॥ १ ॥ पीताम्बरधरं देवं पीतगन्धानु-लेपनम् । पुष्परागविभूषाढ्यं विचित्रमकुटोज्वलम् ॥ २ ॥ स्वर्णाश्वं रथमारुह्य पीतध्वजसुशोभितम् । मेरुं प्रदक्षिणं यान्तं गुरुं देवं

नतोऽस्म्यहम् ॥ ३ ॥ अभीष्टवरदं देवं सर्वज्ञं सुरपूजितम् । सर्व-

कार्यार्थसिद्ध्यर्थं प्रणमामि गुरुं सदा ॥ ४ ॥ बृहस्पतिश्शिरः पातु
ललाटं पातु मे गुरुः। कर्णौ सुरगुरुः पातु नेत्रे मेऽभीष्टदायकः ॥ ५ ॥
नासां नतामरः पातु जिह्वां मे वेदपारगः । मुखं मे पातु सर्वज्ञो
भुजौ भयविनाशनः ॥ ६ ॥ करौ मे वरदः पातु कक्षौ गीर्वाण-
पूजितः । वक्षो वागीश्वरः पातु कुक्षिं क्रतुभुजां गुरुः ॥ ७ ॥ नाभिं
मे पातु नीतिज्ञः कटिं कल्मषवर्जितः । ऊरू पीताम्बरः पातु जङ्घे
मे ज्ञानदायकः ॥ ८ ॥ गीष्पतिः पातु मे पादौ सर्वाङ्गाणि सुरार्चितः ।
प्रातः पुण्यस्मृतिः पातु सङ्गवे सुरवन्दितः ॥ ९ ॥ मध्याह्ने मघव-

द्वन्द्यः सायं सर्वाधिनाशनः । निशीथे निर्मलः पायात् सर्वदा सर्व-

दोऽवतु ॥ १० ॥ जीवस्य कवचं दिव्यं त्रिसन्ध्यं यः पठेन्नरः । सर्वान्कामानवाप्नोति सर्वत्र विजयी भवेत् ॥ ११ ॥

इति बृहस्पतिकवचम् ॥

॥ बृहस्पतिस्तोत्रम् ॥

बृहस्पतिस्सुराचार्यो दयावान् शुभलक्षणः । लोकत्रयगुरुश्श्रीमान सर्वज्ञस्सर्वकोविदः ॥ १ ॥ सर्वेशः सर्वदाऽभीष्टः सर्वजित सर्वपूजितः । अक्रोधनो मुनिश्रेष्ठो नीतिकर्ता गुरुः पिता ॥ २ ॥

विश्वात्मा विश्वकर्ता च विश्वयोनिरयोनिजः । भूर्भुवस्सुवरोञ्चैव भर्ता चैव महाबलः ॥ ३ ॥ पञ्चविंशति नामानि पुण्यानि नियतात्मना । वसता नन्दभवने विष्णुना कीर्तितानि वै ॥ ४ ॥ यः पठेत् प्रात-रुत्थाय प्रयतस्सुसमाहितः । विपरीतोऽपि भगवान् प्रीतो भवति वै गुरुः ॥ ५ ॥ यश्शृणोति गुरुस्तोत्रं चिरञ्जीवेन्न संशयः । बृहस्पति-कृता पीडा न कदाचिद्भविष्यति ॥ ६ ॥

इति गुरुस्तोत्रं सम्पूर्णम् ॥

॥ गुर्वष्टोत्तरशतनामस्तोत्रम् ॥

गुरुर्गुणवरो गोप्ता गोचरो गोपतिप्रियः ।
गुणी गुणवतां श्रेष्ठो गुरूणां गुरुरव्ययः ॥ १
जेता जयन्तो जयदो जीवोऽनन्तो जयावहः ।
आङ्गीरसोऽध्वरासक्तो विविक्तो ऽध्वरकृत्परः ॥ २
वाचस्पतिर्वशी वश्यो वरिष्ठो वाग्विचक्षणः ।
चित्तशुद्धिकरः श्रीमान् चैत्रश्चित्रशिखण्डिजः ॥ ३
बृहद्रथो बृहद्भानुः बृहस्पतिरभीष्टदः ।

सुराचार्यस्सुराराध्यः सुरकार्यहितङ्करः ॥ ४

गीर्वाणपोषको धन्यो गीष्पतिर्गिरिशोऽनघः ।
धीवरो धिषणो दिव्यभूषणो देवपूजितः ॥ ५.
धनुर्धरो दैत्यहन्ता दयासारो दयाकरः ।
दारिद्र्यनाशको धन्यो दक्षिणायनसम्भवः ॥ ६.
धनुर्मीनाधिपो देवो धनुर्बाणधरो हरिः ।
आङ्गीरसाब्दसञ्जातो आङ्गीरसकुलोद्भवः ॥ ७.
सिन्धुदेशाधिपो धीमत्स्वर्णकश्च चतुर्भुजः ।
हेमाङ्गदो हेमवपुर्हेमभूषणभूषितः ॥ ८

पुष्यनाथः पुष्यराग मणिमण्डनमण्डितः ।

काशपुष्पसमानाभो कलिदोषनिवारकः ॥ ९

इन्द्रादिदेवो देवेशो देवताभीष्टदायकः ।
असमानवलस्सत्वगुणसम्पद्विभावसुः ॥ १०

भूसुरोऽभीष्टदो भूरियशः पुण्यविवर्धनः ।
धर्मरूपो धनाध्यक्षो धनदो धर्मपालनः ॥ ११

सर्ववेदार्थतत्त्वज्ञो सर्वापद्विनिवारकः ।
सर्वपापप्रशमनः स्वमतानुगतामरः ॥ १२

ऋग्वेदपारगोऋक्षराशिमार्गप्रचारकः ।

सदानन्दस्सत्यसन्धो सत्यसङ्कल्पमानसः ॥ १३

सर्वागमज्ञस्सर्वज्ञो सर्ववेदान्तविद्गुरः ।
ब्रह्मपुत्रो ब्राह्मणेशः ब्रह्मविद्याविशारदः ॥ १४

समानाधिकनिर्मुक्तः सर्वलोकवशंवदः ।
ससुरासुरगन्धर्ववन्दितस्सत्यभाषणः ॥ १५

बृहस्पतिस्सुराचार्यो दयावान् शुभलक्षणः ।
लोकत्रयगुरुः श्रीमान् सर्वगस्सर्वतोविभुः ॥ १६

सर्वेशस्सर्वदा तुष्टस्सर्वगस्सर्वपूजितः ॥ १६ ॥

इति गुर्वष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

ओं गुरवे नमः
गुणवराय
गोप्त्रे
गोचराय
गोपतिप्रियाय
गुणिने
गुणवतां श्रेष्ठाय
गुरूणांगुरवे
अव्ययाय

ओं जेत्रे नमः १०
जयन्ताय
जयदाय
जीवाय
अनन्ताय
जयावहाय
आङ्गीरसाय
अध्वरासक्ताय
विविक्ताय

ओं अध्वरकृत्पराय नमः
वाचस्पतये २०
वशिने
वश्याय
वरिष्ठाय
वाग्विचक्षणाय
चित्तशुद्धिकराय
श्रीमते
चैत्राय
चित्रशिखण्डिजाय

ओं बृहद्रथाय नमः
बृहद्भानवे ३०
बृहस्पतये
अभीष्टदाय
सुराचार्याय
सुराराध्याय
सुरकार्यहितङ्कराय
गीर्वाणपोषकाय
धन्याय
गीष्पतये

ओं गिरिशाय नमः
अनघाय ४०
धीवराय
धिषणाय
दिव्यभूषणाय
देवपूजिताय
धनुर्धराय
दैत्यहन्त्रे
दयासाराय

ओं दयाकराय नमः
दारिद्र्यनाशकाय
धन्याय ५०
दक्षिणायनसम्भवाय-
धनुर्मीनाधिपाय
देवाय
धनुर्बाणधराय
हरये
आङ्गिरसाब्दसञ्जाताय

ओं आङ्गीरसकुलोद्भवाय नमः
सिन्धुदेशाधिपाय
धीमते
स्वर्णकाय ६०
चतुर्भुजाय
हेमाङ्गदाय
हेमवपुषे
हेमभूषणभूषिताय
पुष्यनाथाय
पुष्यरागमणिमण्डनमण्डिताय

ओं काशपुष्पसमानाभाय नमः
कलिदोषनिवारकाय
इन्द्रादिदेवदेवेशाय
देवताभीष्टदायकाय ७०
असमानबलाय
सत्त्वगुणसम्पद्विभावसवे
भूसुराभीष्टदाय
भूरियशसे
पुण्यविवर्धनाय
धर्मरूपाय

ओं धनाध्यक्षाय नमः
धनदाय
धर्मपालनाय
सर्ववेदार्थतत्त्वज्ञाय ८०
सर्वापद्विनिवारकाय
सर्वपापप्रशमनाय
स्वमतानुगतामराय
ऋग्वेदपारगाय
ऋक्षराशिमार्गप्रचारकाय

ओं सदानन्दाय नमः
सत्यसन्धाय
सत्यसङ्कल्पमानसाय
सर्वागमज्ञाय
सर्वज्ञाय ९०
सर्ववेदान्तविदुषे
ब्रह्मपुत्राय
ब्राह्मणेशाय
ब्रह्मविद्याविशारदाय

ओं समानाधिकनिर्मुक्ताय नमः
सर्वलोकवशंवदाय
ससुरासुरगन्धर्ववन्दिताय
सत्यभाषणाय
बृहस्पतये
सुराचार्याय नमः १००
दयावते
शुभलक्षणाय

ओं लोकत्रयगुरवे नमः
श्रीमते
सर्वज्ञाय
सर्वतोविभवे
सर्वेशाय
सर्वदातुष्टाय
सर्वगाय
सर्वपूजिताय नमः ११०

इति गुर्वष्टोत्तरशतनामावलिस्सम्पूर्णा ॥

शुक्रयन्त्रम् ४५

३	२	१	६	५	४	९	८	७
९	८	७	३	२	१	६	५	४
६	५	४	९	८	७	३	२	१
१	३	२	७	९	८	४	६	५
७	९	८	४	६	५	१	३	२
४	६	५	१	३	२	७	९	८
८	७	९	२	१	३	५	४	६
५	४	६	८	७	९	२	१	३
२	१	३	५	४	६	८	७	९

॥ शुक्रमन्त्रः ॥

ओम् अस्य श्रीशुक्रमहामन्त्रस्य भरद्वाज ऋषिः ॥ त्रिष्टुप्छन्दः॥ शुक्रो देवता ॥ मम शुक्रग्रहप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ दानवपूजिताय अङ्गुष्ठाभ्यां नमः ॥ दैत्याचार्याय तर्जनीभ्यां नमः ॥ वरदाय मध्यमाभ्यां नमः ॥ श्वेतवस्त्राय अनामिकाभ्यां नमः ॥ शुक्राय कनिष्ठिकाभ्यां नमः ॥ कमण्डलुधराय करतलकरपृष्ठाभ्यां नमः ॥ दानवपूजिताय हृदयाय नमः ॥ दैत्याचार्याय शिरसे स्वाहा ॥ वरदाय शिखायै वषट् ॥ श्वेतवस्त्राय कवचाय हुम् ॥ शुक्राय नेत्र-

त्रयाय वौषट् ॥ कमण्डलुधराय अस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति

दिग्बन्धः ॥ ध्यानम् ॥ जटिलञ्चाक्षसूत्रञ्च वरदण्डकमण्डलुम् । श्वेतवस्त्रोज्ज्वलं शुक्रं सर्वदानवपूजितम् ॥ लमित्यादि पञ्चपूजा ॥

लं पृथिव्यात्मने गन्धं समर्पयामि ॥ हं आकाशात्मने पुष्पाणि समर्पयामि ॥ ॥ यं वाय्वात्मने धूपमाघ्रापयामि ॥ रं वह्न्यात्मने दीपं दर्शयामि ॥ वं अमृतात्मने अमृतोपहारं निवेदयामि ॥ सं सर्वात्मने सर्वोपचारान् समर्पयामि ॥

॥ मूलमन्त्रः ॥

प्रवश्शुक्रायभानवे॑ भरध्वँहव्यं मतिञ्चाग्नये सुपूतम् । यो दैव्यानि मानुषा जनूँष्यन्तर्विश्वानि विद्मना जिगाति ॥ अथवा—

शुक्रान्ते अन्यद्यजन्ते अन्यद्विपुरूपे अहनीद्यौरिवासि ।
विश्वाहिममाया अवसि स्वधावोभद्रान्ते पूषन्निहरातिरस्तु ॥

(यथाशक्ति जपेत् ॥ दानवपूजिताय हृदयाय नमः ॥ इत्यादि सर्वोपचारान् समर्पयामीत्यन्तं पठेत् ॥ दिग्बन्ध इत्यत्र दिग्विमोक इति विशेषः ॥ इति शुक्रमहामन्त्रः ॥)

॥ शुक्रकवचम् ॥

ओम् ॥ अस्य श्री शुक्रकवचस्तोत्रमहामन्त्रस्य भरद्वाज ऋषिः ॥ अनुष्टुप्छन्दः ॥ शुक्रो देवता ॥ ह्रां बीजं ॥ ह्रीं शक्तिः ॥ ह्रूं कीलकम् ॥ शुक्रग्रहप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ शुक्राय अङ्गुष्ठाभ्यां नमः ॥

दैत्यगुरवे तर्जनीभ्यां नमः ॥ काव्याय मध्यमाभ्यां नमः ॥ उशनसे अनामिकाभ्यां नमः ॥ भार्गवाय कनिष्ठिकाभ्यां नमः ॥ कवये करतलकरपृष्ठाभ्यां नमः ॥ शुक्राय हृदयाय नमः ॥ दैत्यगुरवे शिरसे स्वाहा ॥ काव्याय शिखायै वषट् ॥ उशनसे कवचाय हुम् ॥ भार्गवाय नेत्रत्रयाय वौषट् । कवये अस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥ शुक्रं चतुर्भुजं देवं अक्षमालाकमण्डलुम् । दण्डहस्तञ्च वरदं द्युतिजालाढ्यशोभितम् ॥ १ ॥ शुक्लाम्बरं शुक्लमाल्यं शुक्लमाल्यानुलेपनम् । वज्रमाभरणं चैव किरीटमकुटोज्वलम् ॥ २ ॥

मृणालकुन्देन्दुपयोहिमप्रभं सिताम्बराढ्यं सितगन्धमालिनम् ।
समस्तशास्त्रश्रुतितत्त्वदर्शनं ध्यायेत्कविं वाञ्छितवस्तुसम्पदम् ॥ ३ ॥
शिरो मे भार्गवः पातु फालं पातु ग्रहाधिपः । नेत्रे दैत्यगुरुः पातु
श्रोत्रे श्रीचन्दनद्युतिः ॥ ४ ॥ पातु मे नासिकां काव्यो वदनं दैत्य-
वन्दितः । रसनामुशना पातु कण्ठं श्रीकण्ठभक्तिमान् ॥ ५ ॥ भुजौ
तेजोनिधिः पातु वक्षो योगविदां वर । अक्षमालाधरो रक्षेत्
कुक्षिं यक्षादिवन्दितः ॥ ६ ॥ कटिं मे पातु विश्वात्मा सक्थिनी सर्व-
पूजितः । जानुनी भार्गवः पातु जङ्घे मे जयदायकः ॥ ७ ॥ गुल्फौ

गुणनिधिः पातु पादौ मे पाण्डराम्बरः । सर्वाण्यङ्गानि मे पातु

शुक्रः कविरहर्निशम् ॥ ८ ॥ कल्ये कविस्सदा पातु सङ्गवे मां सितोऽवतु । मध्याह्ने भार्गवो रक्षेत् सायङ्कालेऽसुरार्चितः ॥ ९ ॥ प्रदोषे पाण्डरः पातु निशीथे नीतिवल्लभः । सन्ध्यायां सर्वदो रक्षेत् दुर्गे मां भृगुनन्दनः ॥१०॥ शुक्रस्य कवचं गुह्यं पठेद्यश्श्रद्धयान्वितः । न तस्य जायते पीडा कापि शुक्रप्रसादतः ॥ ११ ॥

इति शुक्रकवचं सम्पूर्णम् ॥

।। शुक्रस्तोत्रम् ।।

श्रृण्वन्तु मुनयस्सर्वे शुक्रस्तोत्रमिदं शुभम् । रहस्यं सर्वभूतानां शुक्रप्रीतिकरं शुभम् ।। १ ।। येषां सङ्कीर्तनान्नित्यं सर्वान् कामानवाप्नुयात् । तानि शुक्रस्य नामानि कथयामि शुभानि च ।। २ ।। शुक्रश्शुभग्रहः श्रीमान् वर्षकृद्वर्षविघ्नकृत् । तेजोनिधिर्ज्ञानदाता योगी योगविदां वरः ।। ३ ।। दैत्यसञ्जीवनो धीरो दैत्यनेतोशना कविः । नीतिकर्ता ग्रहाधीशो विश्वात्मा लोकपूजितः ।। ४ ।। शुक्लमाल्याम्बरधरः श्रीचन्दनसमप्रभः । अक्षमालाधरः काव्यः तपोमूर्तिर्धनप्रदः ।। ५ ।। चतुर्विंशति नामानि अष्टोत्तरशतं यथा । देवस्याग्रे विशेषेण

पूजां कृत्वा विधानतः ॥ ६ ॥ य इदं पठति स्तोत्रं भार्गवस्य महा-
त्मनः । विषमस्थोऽपि भगवान् तुष्टस्स्यान्नात्र संशयः ॥ ७ ॥ स्तोत्रं
भृगोरिदमनन्तगुणप्रदं यो भक्त्या पठेच्च मनुजो नियतश्शुचिस्सन् ।
प्राप्नोति नित्यमतुलां श्रियमीप्सितार्थान् राज्यं समस्तधनधान्ययुतां
समृद्धिम् ॥ ८ ॥

इति शुक्रस्तोत्रं सम्पूर्णम् ॥

॥ शुक्राष्टोत्तरशतनामस्तोत्रम् ॥

शुक्रश्शुचिश्शुभगुणः शुभदः शुभलक्षणः ।
शोभनाक्षश्शुभ्ररूपः शुद्धस्फटिकभास्वरः ॥ १

दीनार्तिहारको दैत्यगुरुर्देवाभिवन्दितः ।
काव्यासक्तः कामपालः कविः कल्याणदायकः ॥ २

भद्रमूर्तिर्भद्रगुणो भार्गवो भक्तपालनः ।
भोगदो भुवनाध्यक्षो भुक्तिमुक्तिफलप्रदः ॥ ३

चारुशीलश्चारुरूपश्चारुचन्द्रनिभाननः ।
निखिलशास्त्रज्ञो नीतिविद्याधुरन्धरः ॥ ४

सर्वलक्षणसम्पन्नस्सर्वापद्गुणवर्जितः ।
समानाधिकनिर्मुक्तस्सकलागमपारगः ॥ ५
भृगुर्भोगकरो भूमीसुरपालनतत्परः ।
मनस्वी मानदो मान्यो मायातीतो महायशाः ॥ ६
बलिप्रसन्नो भयदो बली बलपराक्रमः ।
भवपाशपरित्यागो बलिबन्धविमोचकः ॥ ७
घनाशयो घनाध्यक्षो कम्बुग्रीवो कलाधरः ।

कारुण्यरससम्पूर्णः कल्याणगुणवर्धनः ॥ ८

श्वेताम्बरश्श्वेतवपुश्चतुर्भुजसमन्वितः ।
अक्षमालाधरोऽचिन्त्यो ह्यक्षीणगुणभासुरः ॥ ९
नक्षत्रगणसञ्चारो नयदो नीतिमार्गदः ।
वर्षप्रदो हृषीकेशो क्लेशनाशकरः कविः ॥ १०
चिन्तितार्थप्रदो शान्तमतिश्चित्तसमाधिकृत् ।
आधिव्याधिहरो भूरि विक्रमो पुण्यदायकः ॥ ११
पुराणपुरुषः पूज्यो पुरुहूतादिसन्नुतः ।
अजेयो विजितारातिर्विविधाभरणोज्ज्वलः ॥ १२

कुन्दपुष्पप्रतीकाशो मन्दहासो महामतिः ।

मुक्ताफलसमानाभो मुक्तिदो मुनिसन्नुतः ॥ १३
रत्नसिंहासनारूढो रथस्थो रजतप्रभः ।
सूर्यप्राग्देशसञ्चारस्सुरशत्रुस्सुहृत्कविः ॥ १४
तुलावृषभराशीशो दुर्धरो धर्मपालकः ।
भाग्यदो भाग्यचारित्रो भवपाशविमोचकः ॥ १५
गौडदेशेश्वरो गोप्ता गुणी गुणविभूषणः ।
ज्येष्ठानक्षत्रसम्भूतो ज्येष्ठः श्रेष्ठश्शुचिस्मितः ॥ १६

अपवर्गप्रदोऽनन्तो सन्तानफलदायकः ।

सर्वैश्वर्यप्रदस्सर्वगीर्वाणगणसन्नुतः ॥ १७

एवं शुक्रग्रहस्यैव क्रमादष्टोत्तरं शतम् ।
सर्वपापप्रशमनं सर्वपुण्यफलप्रदम् ॥ १८

यः पठेच्छृणुयाद्वापि सर्वान् कामानवाप्नुयात् ॥ १८ ॥

इति शुक्राष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

॥ शुक्राष्टोत्तरशतनामावलिः ॥

ओं शुक्राय नमः
शुचये
शुभगुणाय
शुभदाय
शुभलक्षणाय
शोभनाक्षाय
शुभ्रवाहाय
शुद्धस्फटिकभास्वराय
दीनार्तिहारकाय
ओं दैत्यगुरवे नमः १०
देवाभिनन्दिताय
काव्यासक्ताय
कामपालाय
कवये
कल्याणदायकाय
भद्रमूर्तये
भद्रगुणाय
भार्गवाय

ओं भक्तपालनाय नमः
भोगदाय २०
भुवनाध्यक्षाय
भुक्तिमुक्तिफलप्रदाय
चारुशीलाय
चारुरूपाय
चारुचन्द्रनिभाननाय
निधये
निखिलशास्त्रज्ञाय
नीतिविद्यागुरूत्तमाय

ओं सर्वलक्षणसम्पन्नाय नमः
सर्वापगुणवर्जिताय ३०
समानाधिकनिर्मुक्ताय
सकलागमपारगाय
भृगवे
भोगकराय
भूमीसुरपालनतत्पराय
मनस्विने
मानदाय
मान्याय

ओं मायातीताय नमः
महाशयाय ४०
बलिप्रसन्नाय
अभयदाय
बलिने
बलपराक्रमाय
भवपाशपरित्यागाय
बलिबन्धविमोचनाय
धनाशयाय

ओं धनाध्यक्षाय नमः
कम्बुग्रीवाय
कळाधराय ५०
कारुण्यरससम्पूर्णाय
कल्याणगुणवर्धनाय
श्वेताम्बराय
श्वेतवपुषे
चतुर्भुजसमन्विताय
अक्षमालाधराय

ओं अचिन्त्याय नमः

अक्षीणगुणभासुराय
नक्षत्रगणसञ्चाराय
नयदाय ६०
नीतिमार्गदाय
वर्षप्रदाय
हृषीकेशाय
क्लेशनाशकराय
कवये
चिन्तितार्थप्रदाय

ओं शान्तिमते नमः

चित्तसमाधिहृताय
अधिव्याधिहृताय
भूरिविक्रमाय ७०
पुण्यदायकाय
पुराणपुरुषाय
पूज्याय
पुरुहूतादिसन्नुताय
अजेयाय
विजितारातये

ओं विविधाभरणोज्ज्वलाय नमः
कुन्दपुष्पप्रतीकाशाय
मन्दहासाय
महामतये ८०
मुक्ताफलसमानाभाय
मुक्तिदाय
मुनिसन्नुताय
रत्नसिंहासनारूढाय
रथस्थाय

ओं रजतप्रभाय नमः
सूर्यप्राग्देशसञ्चाराय
सुरशत्रुसुहृदे
कवये
तुलावृषभराशीशाय ९०
दुर्धराय
धर्मपालनाय
भाग्यदाय
भव्यचारित्राय

ओं भवबन्धविमोचनाय नमः
गौडदेशेश्वराय
गोप्त्रे
गुणिने
गुणविभूषणाय
ज्येष्ठानक्षत्रसम्भूताय १००
ज्येष्ठाय

ओं श्रेष्ठाय नमः
शुचिस्मिताय
अपवर्गप्रदाय
अनन्ताय
सन्तानफलदायकाय
सर्वैश्वर्यप्रदाय
सर्वगीर्वाणगणसन्नुताय १०८

इति शुक्राष्टोत्तरशतनामावळिस्सम्पूर्णा ॥

॥ शनैश्चरयन्त्रम् ॥

४	६	५	१	३	२	७	९	८
७	९	८	४	६	५	१	३	२
१	३	२	७	९	८	४	६	५
२	१	३	५	४	६	८	७	९
५	४	६	८	७	९	२	१	३
८	७	९	२	१	३	५	४	६
३	२	१	९	८	७	६	५	४
६	५	४	३	२	१	९	८	७
९	८	४	६	[illegible]	[illegible]	[illegible]	२	[illegible]

॥ शनैश्चरमहामन्त्रः ॥

अस्य श्रीशनैश्चरमहामन्त्रस्य उरुमित्रऋषिः । गायत्री छन्दः । शनैश्चरो देवता ॥ शनैश्चरप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ शनैश्चराय अङ्गुष्ठाभ्यां नमः ॥ मन्दगतये तर्जनीभ्यां नमः ॥ अधोक्षजाय मध्यमाभ्यां नमः ॥ सौरये अनामिकाभ्यां नमः ॥ अभयङ्कराय कनिष्ठिकाभ्यां नमः ॥ ऊर्ध्वरोम्णे करतलकरपृष्ठाभ्यां नमः ॥ शनैश्चराय हृदयाय नमः ॥ मन्दगतये शिरसे स्वाहा ॥ अधोक्षजाय शिखायै वषट् ॥ सौरये कवचाय हुम् । अभयङ्कराय नेत्रत्रयाय वौषट् ॥ ऊर्ध्वरोम्णे अस्त्राय फट् ॥ भूर्भुवःस्वरोमिति दिग्बन्धः ॥

ध्यानम् ॥ नीलाम्बरो नीलवपुः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् । चतुर्भुजस्सूर्यसुतः प्रशान्तः सदास्तु मह्यं वरदः प्रसन्नः ॥

॥ लमित्यादि पञ्चपूजा ॥

लं पृथिव्यात्मने गन्धं समर्पयामि ॥ हं आकाशात्मने पुष्पाणि समर्पयामि ॥ यं वाय्वात्मने धूपमाघ्रापयामि ॥ रं वह्न्यात्मने दीपं दर्शयामि ॥ वं अमृतात्मने अमृतोपहारं निवेदयामि ॥

सं सर्वात्मने सर्वोपचारान् समर्पयामि ॥

॥ मूलमन्त्रः ॥

शन्नोदेवी रभिष्टय आपोभवन्तु पीतये । शय्योरभिस्रवन्तु नः॥

(यथाशक्ति जपेत् । शनैश्चराय हृदयाय नम इत्यादि सर्वोपचारान् समर्पयामीत्यन्तं पठेत् । दिग्बन्ध इत्यत्र दिग्विमोक इति विशेषः ॥) इति शनैश्चर महामन्त्रः ॥

॥ शनैश्चरकवचम् ॥

अस्य श्री शनैश्चरकवचमहामन्त्रस्य काश्यपऋषिः ॥ अनुष्टुप्छन्दः ॥ शनैश्चरो देवता ॥ शं बीजं ॥ नं शक्तिः ॥ मं कीलकम् ॥ शनैश्चरकृतपीडापरिहारार्थे जपे विनियोगः ॥ शनैश्चराय अङ्गुष्ठाभ्यां

नमः । मन्दगतये तर्जनीभ्यां नमः ॥ अधोक्षजाय मध्यमाभ्यां नमः ॥ सौरये अनामिकाभ्यां नमः ॥ शुष्कोदराय कनिष्ठिकाभ्यां नमः ॥ छायात्मजाय करतलकरपृष्ठाभ्यां नमः ॥ शनैश्चराय हृदयाय नमः ॥ मन्दगतये सिरसे स्वाहा ॥ अधोक्षजाय शिखायै वषट् ॥ सौरये कवचाय हुम् ॥ शुष्कोदराय नेत्रत्रयाय वौषट् ॥ छायात्मजाय अस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥

कृष्णाम्बरधरं देवं द्विभुजं गृध्रसंस्थितम् । सर्वपीडाहरं नृणां ध्यायेद्ग्रहगणोत्तमम् ॥१॥ शनैश्चरश्शिरो रक्षेत् मुखं भक्तार्तिभञ्जनः ।

कर्णौ कृष्णाम्बरो रक्षेत् नेत्रे सर्वभयङ्करः ॥ २ ॥ कृष्णाङ्गो नासिकां रक्षेत् कण्ठं मे शितिकण्ठकः । भुजौ मे सुभुजः पातु हस्तौ नीलो-त्पलप्रभः ॥ ३ ॥ पातु मे हृदयं कृष्णः कुक्षिं शुष्कोदरस्तथा । कण्ठं मे विकटः पातु सक्थिनी घोररूपवान् ॥ ४ ॥ जानुनी पातु दीर्घो मे जङ्घे मे मङ्गलप्रदः । गुल्फौ गुणाकरः पातु पादौ मे पङ्गुपादकः ॥ ५ ॥ सर्वाण्यपि ममाङ्गानि पातु भास्करनन्दनः । य इदं कवचं दिव्यं सर्वपीडाहरं नृणाम् ॥ ६ ॥ पठति श्रद्धया युक्तः सर्वान् कामानवाप्नुयात् ॥ तिलधान्ये च संस्थाप्य यन्त्रं लोहविनिर्मितम् ॥७॥ कृष्णगन्धाक्षतैः पुष्पैः अर्चयन्मूलमन्त्रतः । कृष्णवस्त्रयुतं दद्यात्

श्रोत्रियाय कुटुम्बिने ॥ ८ ॥ प्रीतश्शनैश्चरस्तस्य सर्वबाधां व्यपोहति ।
दद्यात्सर्वसमृद्धिं च पुत्रपौत्रादिसन्ततिम् ॥ ९ ॥ आयुष्यं दीर्घमारोग्यं
सर्वत्र विजयं दिशेत् ॥

इति शनैश्चरकवचं सम्पूर्णम् ॥

॥ शनैश्चरस्तोत्रम् ॥

अस्य श्री शनैश्चरस्तोत्रमहामन्त्रस्य काश्यप ऋषिः ॥ अनुष्टु-

प्छन्दः ॥ शनैश्चरो देवता ॥ शं बीजम ॥ नं शक्तिः ॥ मं कीलकम् ॥

शनैश्चरप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ शनैश्चराय अङ्गुष्ठाभ्यां नमः ॥ मन्दगतये तर्जनीभ्यां नमः ॥ सौरये अनामिकाभ्यां नमः ॥ शुष्कोदराय कनिष्ठिकाभ्यां नमः ॥ छायात्मजाय करतलकरपृष्ठाभ्यां नमः ॥ शनैश्चराय हृदयाय नमः ॥ मन्दगतये शिरसे स्वाहा ॥ अधोक्षजाय शिखायै वषट् ॥ सौरये कवचाय हुम् ॥ शुष्कोदराय नेत्रत्रयाय वौषट् ॥ छायात्मजाय अस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥ चापासनो गृध्ररथस्तु नीलः प्रत्यङ्मुखः काश्यपगोत्रजातः । सशूलचापेषु गदाधरोऽव्यात् सौराष्ट्रदेशप्रभवश्च सौरिः ॥ १ ॥ नीलाम्बरो नीलवपुः किरीटी गृध्रासनस्थो विकृता-

ननश्च । केयूरहारादिविभूषिताङ्गस्सदास्तु मे मन्दगतिः प्रसन्नः ॥ २ ॥
शनैश्चराय शान्ताय सर्वाभीष्टप्रदायिने । नमस्सर्वात्मने तुभ्यं नमो
नीलाम्बराय च ॥ ३ ॥ द्वादशाष्टमजन्मानि द्वितीयान्तेषु राशिषु ।
ये ये मे सङ्गता दोषाः सर्वे नश्यन्तु वै प्रभो ॥ ४ ॥ सूत उवाच ॥
शृणुध्वं मुनयस्सर्वे शनिपीडाहरं शुभम् । शनिप्रीतिकरं स्तोत्रं सर्वा-
भीष्टफलप्रदम् ॥ ५ ॥ पुरा कैलासशिखरे पार्वत्यै शङ्करेण च । उप
दिष्टं शनिस्तोत्रं प्रवक्ष्यामि तपोधनाः ॥ ६ ॥ रघुवंशेति विख्यातो

राजा दशरथः प्रभुः । बभूव चक्रवर्ती च सप्तद्वीपाधिपो बली ॥७॥

कृत्तिकान्ते शनौ याते दैवज्ञैर्ज्ञापितो हि सः । रोहिणी शकटं भित्त्वा शनिर्यास्यति सांप्रतम् ॥ ८ ॥ इत्थं शकटभेदेन सुरासुरभयङ्करम् । द्वादशाब्दन्तु दुर्भिक्षं भविष्यति सुदारुणम् ॥ ९ ॥ देशाश्च नगरग्रामाः भयभीतास्समन्ततः । ब्रुवन्ति सर्वलोकानां भयमेतत्समागमम् ॥ १० ॥ एवमुक्तस्ततो वाक्यं मन्त्रिभिस्सहपार्थिवः । व्याकुलं तु जगद्दृष्ट्वा पौरजानपदादिकम् ॥ ११ ॥ पप्रच्छ प्रयतो राजा वसिष्ठप्रमुखानृषीन् । समाधानं किमस्यास्ति ब्रूत मे मुनिसत्तमाः ॥१२॥ प्रजानां परिरक्षार्थं सर्वज्ञास्सर्वदर्शिनः । तच्छ्रुत्वा मुनयस्सर्वे प्रोचुरस्सर्वं महत् ॥ १३ ॥ शनैश्चरेण शकटे तस्मिन् भिन्ने कृतः

प्रजाः । अयं योगो ह्यसाध्यस्तु शक्रब्रह्मादिभिस्तथा ॥ १४ ॥ स तु
संचिन्त्य मनसा सहसा पुरुषर्षभः । समाधाय धनुर्दिव्यं दिव्यायुध-
समन्वितम् ॥ १५ ॥ रथमारुह्य वेगेन गतो नक्षत्रमण्डलम् । सपा-
दयोजनं लक्षं सूर्यस्योपरिसंस्थितम् ॥ १६ ॥ रोहिणीं पृष्ठतः स्थाप्य राज ।
दशरथस्तदा । रथे तु काञ्चने दिव्ये सर्वरत्नविभूषिते ॥ १७ ॥
हंसवर्णहयैर्युक्ते महाकेतुसमुच्छ्रिते । दीप्यमानो महारत्नैः किरीटकट-
कादिभिः ॥ १८ ॥ बभ्राज स तदाऽऽकाशे द्वितीय इव भास्करः ।

आकर्णपूर्णचापेन संहारास्त्रं न्ययोजयत् ॥ १९ ॥ संहारास्त्रं शनि-

दृष्ट्वा सुरासुरभयङ्करम् । कृत्तिकान्ते तदा स्थित्वा प्रविशन्किल रोहिणीम् ॥ २० ॥ दृष्ट्वा दशरथं चाग्रे तस्थौ सभ्रुकुटीमुखः । हसित्वा तद्भयात्सौरिरिदं वचनमब्रवीत् ॥ २१ ॥ पौरुषं तव राजेन्द्र सुरासुरभयङ्करम् । देवासुरमनुष्याश्च सिद्धविद्याधरोरगाः ॥ २२ ॥ मयाऽवलोकितास्सर्वे दैन्यमाशु व्रजन्ति ते । तुष्टोऽहं तव राजेन्द्र तपसा पौरुषेण च ॥ २३ ॥ वरं ब्रूहि प्रदास्यामि मनसा यदभीप्सितम् । दशरथ उवाच—(प्रसादं कुरु मे सौरे वरदो यदि मे स्थितः ।) अद्य प्रभृति मे राष्ट्रपीडा कार्या न कस्यचित् ॥ २४ ॥ रोहिणीं भेदयित्वा तु न गन्तव्यं त्वया शनै । सरितस्सागरास्सर्वे

यावच्चन्द्रार्कमेदिनी ॥ २५ ॥ द्वादशाब्दं तु दुर्भिक्षं न कदाचिद्भ-
विष्यति । याचितं तु मया सौरे नान्यदिच्छाम्यहं वरम् ॥ २६ ॥
एवमस्त्विति सुप्रीतो वरं प्रादात्तु शाश्वतम् । कीर्तिरेषा त्वदीया च
त्रैलोक्ये सम्भविष्यति ॥ २७ ॥ प्राप्य चैनं वरं राजा कृतकृत्योऽ-
भवत्तदा । एवं वरं तु सम्प्राप्य हृष्टरोमा स पार्थिवः ॥ २८ ॥
रथोपस्थे धनुस्स्थाप्य भूत्वा चैव कृताञ्जलिः । ध्यात्वा सरस्वतीं देवीं
गणनाथं विनायकम् ॥ २९ ॥ राजा दशरथः स्तोत्रं सौरेरिदमथा-

करोत् । दशरथ उवाच—नमः कृष्णाय नीलाय शितिकण्ठनिभाय च ।

॥ ३० ॥ नमो नीलमुखाब्जाय नीलोत्पलनिभाय च । नमो निर्मांस-
देहाय दीर्घश्मश्रुजटाय च ॥ ३१ ॥ नमो विशालनेत्राय शुष्कोदर
भयानक । नमः परुषनेत्राय स्थूलरोम्णे नमो नमः ॥ ३२ ॥ नमो
नित्यं क्षुधार्ताय अतृप्ताय नमो नमः । नमो दीर्घाय शुष्काय काल-
दंष्ट्राय ते नमः ॥ ३३ ॥ नमस्ते घोररूपाय दुर्निरीक्ष्याय ते नमः ।
नमो घोराय रौद्राय भीषणाय कराळिने ॥ ३४ ॥ नमस्ते सर्वभक्षाय
वलीमुख नमोऽस्तु ते । सूर्यपुत्र नमस्तेऽस्तु भास्कराऽभयदायिने ॥
अधोदृष्टे नमस्तेऽस्तु संवर्तक नमो नमः । नमो मन्दगते तुभ्यं निस्त्रिं-
शाय नमो नमः ॥ ३६ ॥ नमो दुःसहदेहाय नित्ययोगरताय च ।

ज्ञानदृष्टे नमस्तेऽस्तु कश्यपात्मजसूनवे ॥३७॥ तुष्टो ददासि त्वं राज्यं
क्रुद्धो हरसि तत् क्षणात् । देवासुरमनुष्याश्च सिद्धविद्याधरोरगाः ॥
३८ ॥ त्वयाऽवलोकितास्सर्वे दैन्यमाशु व्रजन्ति ते । ब्रह्मा शक्रो
यमश्चैव ऋषयस्सप्तसागराः ॥३९॥ राज्यभ्रष्टा भवन्तीह तव दृष्ट्या-
वलोकिताः । देशाश्च नगरग्रामाः द्वीपाश्च गिरयस्तथा ॥ ४० ॥
सरितस्सागरास्सर्वे नाशं यान्ति समूलतः । प्रसादं कुरु मे सौरे
वरदोऽसि महाबल ॥४१॥ एवमुक्तस्तदा सौरिः ग्रहराजो महाबलः ।
अब्रवीच्च शनिर्वाक्यं हृष्टरोमा सभास्करः ॥ ४२ ॥ शनिरुवाच—

तुष्टोऽहं तव राजेन्द्र स्तोत्रेणानेन सुव्रत । वरं ब्रूहि प्रदास्यामि मनसा यदभीप्सितम् ॥ ४३ ॥ दशरथ उवाच—प्रसन्नो यदि मे सौरे पीडां कुरु न कस्यचित् । देवासुरमनुष्याणां पशुपन्नगपक्षिणाम् ॥४४॥ शनिरुवाच—ग्रहणाच्च ग्रहा ज्ञेयाः ग्रहाः पीडाकराः स्मृताः । अदेयोऽपि वरोऽस्माभिः तुष्टो हन्तु ददामि ते ॥ ४५ ॥ देवासुरमनुष्याश्च सिद्धविद्याधरोरगाः । पशुपक्षिमृगावृक्षाः पीडां मुञ्चन्तु सर्वदा ॥४६॥ त्वया प्रोक्तमिदं स्तोत्रं यः पठेदिह मानवः । एककालं कचित्कालं पीडां मुञ्चामि तस्य वै ॥ ४७ ॥ मृत्युस्थानगतो वाऽपि जन्मव्ययगतोऽपि वा । पठेत श्रद्धया युक्तः शुचिः स्नात्वा समाहितः ॥४८॥

शमीपत्रैस्समभ्यर्च्य प्रतिमां लोहजां मम । माषौदनं तिलैर्मिश्रं दद्या-
ल्लोहन्तु दक्षिणाम् ॥४९॥ कृष्णां गां महिषीं वस्त्रं मामुद्दिश्य द्विजा-
तये । मद्दिने तु विशेषेण स्तोत्रेणानेन पूजयेत् ॥ ५० ॥ पूजयित्वा
जपेत् स्तोत्रं भूत्वा चैव कृताञ्जलिः । तस्य पीडां नचैवाहं करिष्यामि
कदाचन ॥५१॥ गोचरे जन्मलग्ने वा दशास्वन्तर्दशासु च । रक्षामि
सततं तस्य पीडास्वन्यग्रहस्य च ॥५२॥ अनेनैव प्रकारेण पीडामुक्तं
जगद्भवेत् । सूत उवाच— वरद्वयं तु सम्प्राप्य राजा दशरथस्तदा ॥
५३ ॥ मेने कृतार्थमात्मानं नमस्कृत्य शनैश्चरम् । शनिनाचाभ्यनु-

ज्ञातः स्वस्थानमगमन्नृपः ॥ ५४ ॥ स्वस्थानं च ततो गत्वा प्राप्तकामो-
ऽभवत्तदा । कोणश्शनैश्चरो मन्दः छायाहृदयनन्दनः ॥ ५५ ॥
मार्ताण्डजस्तथा सौरिः पातङ्गिर्ग्रहनायकः । ब्रह्मण्यः क्रूरकर्मा च
नीलवस्त्रोऽञ्जनद्युतिः ॥५६॥ द्वादशैतानि नामानि यः पठेच्च दिनेदिने ।
विषमस्थोऽपि भगवान् सुप्रीतस्तस्य जायते ॥ ५७ ॥ मन्दवारे शुचि-
स्स्नात्वा मिताहारो जितेन्द्रियः । तद्वर्णकुसुमैर्युक्तं सर्वाङ्गं द्विजसत्तमः
॥ ५८ ॥ पूजयित्वान्नपानाद्यैः स्तोत्रं यः प्रयतः पठेत् । पुत्रकामो
लभेत्पुत्रं धनकामो लभेद्धनम् ॥५९॥ राज्यकामो लभेद्राज्यं जयार्थी
विजयीभवेत् । आयुष्कामो लभेदायुः श्रीकामः श्रियमाप्नुयात् ॥६०॥

यद्यदिच्छति तत्सर्वं भगवान् भक्तवत्सलः । चिन्तितानि च सर्वाणि ददाति च न संशयः ॥ ६१ ॥

इति दशरथमहाराजकृतं शनैश्चरस्तोत्रं सम्पूर्णम्

॥ शन्यष्टोत्तरशतनामस्तोत्रम् ॥

शनैश्चराय शान्ताय सर्वाभीष्टप्रदायिने ।
शरण्याय वरेण्याय सर्वेशाय नमो नमः ॥ १
सौम्याय सुरवन्द्याय सुरलोकविहारिणे ।

सुखासनोपविष्टाय सुन्दराय नमोनमः ॥ २
घनाय घनरूपाय घनाभरणधारणे ।
घनसारविलेपाय खद्योताय नमो नमः ॥ ३
मन्दाय मन्दचेष्टाय महनीयगुणात्मने ।
मर्त्यपावकपादाय महेशाय नमो नमः ॥ ४
छायापुत्राय शर्वाय शततूणीरधारिणे ।
चरस्थिरस्वभावाय चञ्चलाय नमो नमः ॥ ५
नीलवर्णाय नित्याय नीलाञ्जननिभाय च ।
नीलाम्बरविभूषाय निश्चलाय नमो नमः ॥ ६

वेद्याय विधिरूपाय विरोधाधारभूमये ।
वेदास्पदस्वभावाय वज्रदेहाय ते नमः ॥ ७

वैराग्यदाय वीराय वीतरोगभयाय च ।
विपत्परम्परेशाय विश्ववन्द्याय ते नमः ॥ ८

गृध्रवाहाय गूढाय कूर्माङ्गाय कुरूपिणे ।
कुत्सिताय गुणाढ्याय गोचराय नमो नमः ॥ ९

अविद्यामूलनाशाय विद्याऽविद्यास्वरूपिणे ।
आयुष्यकारणायापदुद्धर्त्रे च नमो नमः ॥ १०

विष्णुभक्ताय वशिने विविधागमवेदिने ।
विधिस्तुत्याय वन्द्याय विरूपाक्षाय ते नमः ॥ ११

वरिष्ठाय गरिष्ठाय वज्राङ्कुशधराय च ।
वरदाभयहस्ताय वामनाय नमो नमः ॥ १२

ज्येष्ठापत्नीसमेताय श्रेष्ठाय मितभाषिणे ।
अष्टौघनाशकार्याय पुष्टिदाय नमो नमः ॥ १३

स्तुत्याय स्तोत्रगम्याय भक्तिवश्याय भानवे ।
भानुपुत्राय भव्याय पावनाय नमो नमः ॥ १४

धनुर्मण्डलसंस्थाय धनदाय धनुष्मते ।

तनुप्रकाशदेहाय तामसाय नमो नमः ॥ १५
अशेषफलवन्द्याय विशेषफलदायिने ।
वशीकृतजनेशाय पशूनां पतये नमः ॥ १६
खेचराय खगेशाय घननीलाम्बराय च ।
काठिन्यमानसायार्यगणस्तुत्याय ते नमः ॥ १७
नीलच्छत्राय नित्याय निर्गुणाय गुणात्मने ।
निरामयाय निन्द्याय वन्दनीयाय ते नमः ॥ १८
धीराय दिव्यदेहाय दीनार्तिहरणाय च ।

दैन्यनाशकरायार्यजनगण्याय ते नमः ॥ १९

क्रूराय क्रूरचेष्टाय कामक्रोधकराय च ।
कळत्रपुत्रशत्रुत्वकारणाय नमो नमः ॥ २०

परिपोषितभक्ताय परभीतिहराय च ।
भक्तसङ्घमनोभीष्टफलदाय नमो नमः ॥ २१

इत्थं शनैश्चरस्येदं नाम्नामष्टोत्तरं शतम् ।
प्रत्यहं प्रजपन्मर्त्यो दीर्घमायुरवाप्नुयात् ॥ २२

इति शनैश्चराष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

॥ शन्यष्टोत्तरशतनामावळिः ॥

ओं शनैश्चराय नमः
शान्ताय
सर्वाभीष्टप्रदायिने
शरण्याय
वरेण्याय
सर्वेशाय
सौम्याय
सुरवन्द्याय
सुरलोकविहारिणे

ओं सुखासनोपविष्टाय नमः १०
सुन्दराय
घनाय
घनरूपाय
घनाभरणधारिणे
घनसारविलेपनाय
खद्योताय
मन्दाय
मन्दचेष्टाय

ओं महनीयगुणात्मने

मर्त्यपावनपादाय २०

महेशाय

छायापुत्राय

शर्वाय

शततूणीरधारिणे

चरस्थिरस्वभावाय

चञ्चलाय

नीलवर्णाय

नित्याय

ओं नीलाञ्जननिभाय नमः

नीलाम्बरविभूषाय ३०

निश्चलाय

वेद्याय

विधिरूपाय

विरोधाधारभूमये

वेदास्पदस्वभावाय

वज्रदेहाय

वैराग्यदाय

वीराय

ओं वीतरोगभयाय नमः
विपत्परंपरेशाय ४०
विश्ववन्द्याय
गृध्रवाहनाय
गूढाय
कूर्माङ्गाय
कुरूपिणे
कुत्सिताय
गुणाढ्याय

ओं गोचराय नमः
अविद्यामूलनाशनाय
विद्याऽविद्यास्वरूपिणे ५०
आयुष्यकारणाय
आपदुद्धर्त्रे
विष्णुभक्ताय
वशिने
विविधागमवेदिने
विधिस्तुत्याय

ॐ वन्द्याय नमः
विरूपाक्षाय
वरिष्ठाय
गरिष्ठाय ६०
वज्राङ्कुशधराय
वरदाय
अभयहस्ताय
वामनाय
ज्येष्ठापत्नीसमेताय
श्रेष्ठाय

ॐ मितभाषिणे नमः
कष्टौघनाशनाय
आर्यपुष्टिदाय
स्तुत्याय ७०
स्तोत्रकाम्याय
भक्तिवश्याय
भानवे
भानुपुत्राय
भव्याय
पावनाय

ओं धनुर्मण्डलसंस्थाय नमः

धनदाय

धनुष्मते

तनुप्रकाशदेहाय ८०

तामसाय

अशेषजनवन्द्याय

विशेषफलदायिने

वशीकृतजनेशाय

पशूनांपतये

ओं खेचराय नमः

घननीलाम्बराय

काठिन्यमानसाय

आर्यगणस्तुत्याय

नीलच्छत्राय ९०

नित्याय

निर्गुणाय

गुणात्मने

निरामयाय

ॐ निन्द्याय नमः
वन्दनीयाय
धीराय
दिव्यदेहाय
दीनार्तिहरणाय
दैन्यनाशनाय
आर्यजनगण्याय

१०८

ॐ क्रूराय नमः
क्रूरचेष्टाय
कामक्रोधकराय
कळत्रपुत्रशत्रुत्वकारणाय
परिपोषितभक्ताय
परभीतिहराय
भक्तसङ्घमनोभीष्टफलदाय

अनया पूजया भगवान् सर्वदेवात्मकस्सुप्रीतस्सुप्रसन्नो भवतु ॥
इति शन्यष्टोत्तरशतनामावलिस्सम्पूर्णा

॥ राहुयन्त्रम् ४५ ॥

२	७	८	१	५	६	३	९	४
३	९	४	२	७	८	१	५	६
१	५	६	३	९	४	२	७	८
७	८	२	५	६	१	९	४	३
९	४	३	७	८	२	५	६	१
५	६	१	९	४	३	७	८	२
८	२	७	६	१	५	४	३	९
४	३	९	८	२	७	६	१	५
६	१	५	४	३	९	८	२	७

॥ राहुमहामन्त्रः ॥

अस्य श्रीराहुमहामन्त्रस्य वामदेव ऋषिः ॥ गायत्री च्छन्दः राहुर्देवता ॥ राहुप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ धूम्रवर्णाय अङ्गुष्ठाभ्यां नमः ॥ करालवदनाय तर्जनीभ्यां नमः ॥ खण्डवराय मध्यमाभ्यां नमः ॥ महाशूराय अनामिकाभ्यां नमः ॥ त्रिशूलधराय कनिष्ठिकाभ्यां नमः ॥ नीलसिंहासनस्थाय करतलकरपृष्ठाभ्यां नमः ॥ धूम्रवर्णाय हृदयाय नमः ॥ करालवदनाय शिरसे स्वाहा ॥ खण्डवराय शिखायै वषट् ॥ महाशूराय कवचाय हुम् ॥ त्रिशूलधराय नेत्रत्रयाय वौषट् ॥ नीलसिंहासनस्थाय अस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति

दिग्बन्धः ॥ ध्यानम्—करालवदनं खड्गचर्मशूलवरान्वितम् । नील-
सिंहासनं राहुं ध्यायेद्रोगप्रशान्तये ॥

॥ लमित्यादि पञ्चपूजा ॥

लं पृथिव्यात्मने गन्धं समर्पयामि । हं आकाशात्मने पुष्पाणि समर्पयामि । यं वाय्वात्मने धूपमाघ्रापयामि । रं वह्न्यात्मने दीपं दर्शयामि । वं अमृतात्मने अमृतोपहारं निवेदयामि । सं सर्वात्मने सर्वोपचारान् समर्पयामि ॥

॥ मूलमन्त्रः ॥

कयानश्चित्र आभूवदूती सदावृधस्सखा । कयाशचिष्ठयावृता ॥

यथाशक्ति जपेत् । धूम्रवर्णाय हृदयाय नम इत्यादि सर्वोपचारान् समर्पयामीत्यन्तं पठेत् । दिग्बन्ध इत्यत्र दिग्विमोक इति विशेषः ॥ इति राहुमहामन्त्रः ॥

॥ राहुकवचम् ॥

अस्य श्रीराहुकवचमहामन्त्रस्य । चन्द्रः ऋषिः ॥ अनुष्टुप्छन्दः । राहुर्देवता । राहुग्रहप्रसादसिद्ध्यर्थे जपे विनियोगः । रां अङ्गुष्ठाभ्यां नमः ॥ रीं तर्जनीभ्यां नमः । रूं मध्यमाभ्यां नमः रैं अनामिका-

भ्यां नमः । रौं कनिष्ठिकाभ्यां नमः । रः करतलकरपृष्ठाभ्यां नमः । रां हृदयाय नमः । रीं शिरसे स्वाहा । रूं शिखायै वषट् । रैं कवचाय हुम् । । रौं नेत्रत्रयाय वौषट् । रः अस्त्राय फट् । भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम्—प्रणमामि सदा राहुं सर्वाकारं किरीटिनम् । सैंहिकेयं करालास्यं भक्तानामभयप्रदम् ॥ १ ॥ राहुं चतुर्भुजं चर्मं शूलखड्गवराङ्कितम् । कृष्णमाल्याम्बरधरं कृष्णगन्धानुलेपनम् ॥ २ ॥ गोमेधकविभूषक्च विचित्रमकुटोज्वलम् । कृष्णसिंहरथं यान्तं मेकं चैव प्रदक्षिणम् ॥ ३ ॥ नीलाम्बरः शिरः पातु ललाटं लोक-

वन्दितः । चक्षुषी पातु मे राहुः श्रोत्रमर्धशरीरवान् ॥ ४ ॥ नासिकां मे करालास्यः शूलपाणिर्मुखं मम ; जिह्वां मे सिंहिकासूनुः कण्ठं मे कष्टनाशनः ॥ ५ ॥ भुजङ्गेशो भुजौ पातु नीलमाल्यः करौ मम । पातु वक्षस्तपोमूर्तिः पातु नाभिं विधुन्तुदः ॥ ६ ॥ कटिं मे विकटः पायादूरू मेऽसुरपूजितः । स्वर्भानुर्जानुनी पातु जङ्घे मे पातु चाव्ययः ॥ ७ ॥ गुल्फौ गृहाधिपः पातु नीलचन्दनभूषितः । पादौ नीलाम्बरः पातु सर्वाङ्गं सिंहिकासुतः ॥८॥ प्रातर्भुजङ्गमः पातु सङ्गवे सिंहिकासुतः । मध्याह्ने पातु मां राहुः सायं सप्ताश्वमर्दनः ॥ ९ ॥ प्रदोषे पन्नगः पायादर्धरात्रेऽर्धविग्रहः । [illegible] सर्वदा पायात् दुर्गान्मां

क्षानवोऽवतु ॥ १० ॥ राहोरिदं कवचमीप्सितदायकं यो भक्त्या पठेदनुदिनं नियतान्तरात्मा । प्राप्नोति कीर्तिममलां सममृद्धिमिष्टा-मारोग्यमायुरतुलं विरुजं शरीरम् ॥ ११ ॥

इति राहु कवचं सम्पूर्णम्

॥ राहुस्तोत्रम् ॥

अस्य श्री राहुस्तोत्रमहामन्त्रस्य वामदेव ऋषिः ॥ अनुष्टुप्छन्दः राहुर्देवता ॥ राहुप्रसादसिद्ध्यर्थं जपे विनियोगः ॥ काश्यप उवाच ॥

शृण्वन्तु मुनयस्सर्वे राहुप्रीतिकरं स्तवम् । सर्वरोगप्रशमनं विषभीति-
हरं परम् ॥ १ ॥ सर्वसम्पत्करं चैव गुह्यमेतदनुत्तमम् । आदरेण
प्रवक्ष्यामि श्रूयतामवधानतः ॥ २ ॥ राहुस्सूर्यरिपुश्चैव विषज्वाली
भयाननः । सुधांशुवैरी श्यामात्मा विष्णुचक्रांकितो बली ॥ ३ ॥
भुजगेशस्तीक्ष्णदंष्ट्रः क्रूरकर्मा ग्रहाधिपः । द्वादशैतानि नामानि नित्यं
यो नियतः पठेत् ॥ ४ ॥ जप्त्वा तु प्रतिमां रम्यां सीसजां माष-
सुस्थिताम् । नीलगन्धाक्षतैः पुष्पैः भक्त्या सम्पूज्य यत्नतः ॥ ५ ॥
विधिना वह्निमादाय दूर्वान्नाज्याहुतीः क्रमात् । तन्मन्त्रेणैव जुहुयात
यावदष्टोत्तरं शतम् ॥ ६ ॥ हुत्वैवं भक्तिमान्[illegible] प्रार्थयेद्ग्रहनायकम् ।

सर्वापद्विनिवृत्त्यर्थं प्राञ्जलिः प्रणतो नरः ॥ ७ ॥ राहो कराळवदन
रविचन्द्रभयङ्कर । तमोरूप नमस्तुभ्यं प्रसादं कुरु सर्वदा ॥ ८ ॥
सिंहिकासुत सूर्यारे सिद्धगन्धर्वपूजित । सिंहवाह नमस्तुभ्यं सर्वान्रो-
गान्निवारय ॥ ९ ॥ कृपाणफलकाहस्त त्रिशूलिन् वरदायक । गर-
लातिगरालास्य गदान्मे नाशयाखिलान् ॥ १० ॥ स्वर्भानो सर्पवदन
सुधाकरविमर्दन । सुरासुरवरस्तुत्य सर्वदा त्वं प्रसीद मे ॥ ११ ॥
इति सम्प्रार्थितो राहुः दुष्टस्थानगतोऽपि वा । सुप्रीतो जायते तस्य

सर्वरोगान्विनाशयेत् ॥ १२ ॥ विषान्न जायते भीतिः महारोगस्य

का कथा । सर्वान्कामानवाप्नोति नष्टं राज्यमवाप्नुयात् ॥ १३ ॥ एवं पठेदनुदिनं स्तवराजमेतं मर्त्यः प्रसन्नहृदयो विजितेन्द्रियो यः । आरोग्यमायुरतुलं लभते सुपुत्रान् सर्वे महाविषमगास्स्युरतिप्रसन्नाः ॥

इति राहुस्तोत्रं सम्पूर्णम् ॥

—•◆•—

॥ राह्वष्टोत्तरशतनामस्तोत्रम् ॥

शृणु नामानि राहोश्च सैंहिकेयो विधुन्तुदः ।
सुरशत्रुस्तमश्चैव फणिर्गार्ग्याननस्तथा ॥ १
सुरागुर्नीलजीमूतसङ्काशश्च चतुर्भुजः ।

खड्गखेटकधारी च वरदायकहस्तकः ॥ २
शूलायुधो मेघवर्णः कृष्णध्वजपताकवान् ।
दक्षिणाशामुखरथस्तीक्ष्णदंष्ट्राकरस्तथा ॥ ३
शूर्पागारासनस्थश्च गोमेधाभरणप्रियः ।
माषप्रियः काश्यपर्षिनन्दनो भुजगेश्वरः ॥ ४
उल्कापातयिताशूलनिधिपः कृष्णसर्पराट् ।
वृषत्पालवृतास्योऽर्धशरीरो जाड्यप्रदः ॥ ५

रवीन्दुभीकरश्छायास्वरूपी कठिनाङ्गकः ।

द्विषच्चक्रच्छेदकोऽथ करालास्यो भयङ्करः ॥ ६
क्रूरकर्मा तमोरूपश्श्यामात्मा नीललोहितः ।
किरीटी नीलवसनः शनिसामन्तवर्त्मगः ॥ ७
चण्डालवर्णोऽथाश्व्यर्क्षभवो मेषभवस्तथा ।
शनिवत्फलदश्शूलोऽपसव्यगतिरेव च ॥ ८
उपरागकरस्सूर्येन्दुच्छविह्लादकारकः ।
नीलपुष्पविहारश्च ग्रहश्रेष्ठोऽष्टमग्रहः ॥ ९
कबन्धमात्रदेहश्च यातुधानकुलोद्भवः ।
गोविन्दवरपात्रं च देवजातिप्रविष्टकः ॥ १०

क्रूरो घोरश्शनेर्मित्रं शुक्रमित्रमगोचरः ।
माने गङ्गास्नानदाता स्वगृहे प्रबलाढ्यकः ॥ ११
सद्गृहेन्यस्थबलधृक्चतुर्थे मातृनाशकः ।
चन्द्रयुक्ते तु चण्डाळजन्मसूचक एव तु ॥ १२
जन्मसिंहोराज्यदाता महाकायस्तथैव च ।
जन्मकर्ता विधुरिपुः मत्तकाज्ञानदश्च सः ॥ १३
जन्मकन्याराज्यदाता जन्महानिद एव च ।

नवमे पितृनाशश्च पञ्चमे शोकदायकः ॥ १४

द्यूने कळत्रहन्ता च सप्तमे कलहप्रदः ।
षष्ठे तु वित्तदाता च चतुर्थे वैरदायकः ॥ १५
नवमे पापदाता च दशमे शोकदायकः ।
आदौ यशः प्रदाता च ह्यन्ते वैरप्रदायकः ॥ १६
कालात्मा गोचराचारो धनेचास्य ककुत्प्रदः ।
पञ्चमे दूषणाभृङ्गदस्स्वर्मानुर्वली तथा ॥ १७
महासौख्यप्रदायी च चन्द्रवैरी च शाश्वतः ।
सूरशत्रुः पापगृहश्शाम्भवः पूज्यकस्तथा ॥ १८
पाठीनपूरणश्चाथ पैठीनसकुलोद्भवः ।

दीर्घकृष्णोऽशिरो विष्णुः नेत्रारिर्देवदानवौ ॥ १९
भक्तरक्षा राहुमूर्तिस्सर्वाभीष्टफलप्रदः ।
एवद्राहुग्रहस्योक्तं नाम्नामष्टोत्तरं शतम् ॥ २०
श्रद्धया यो जपेन्नित्यं मुच्यते सर्वसङ्कटात् ।
सर्वसम्पत्करश्चैव सर्वाभीष्टप्रदायकम् ॥ २१

इति राह्वष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्

॥ राह्वष्टोत्तरशतनामावळिः ॥

ओं राहवे नमः
सैंहिकेयाय
विधुन्तुदाय
सुरशत्रवे
तमसे
प्रणये
गार्ग्याननाय
सुरागवे
नीलजीमूतसङ्काशाय

ओं चतुर्भुजाय नमः १०
खड्गखेटकधारिणे
वरदायकहस्तकाय
शूलायुधाय
मेघवर्णाय
कृष्णध्वजपताकवते
दक्षिणाशामुखरथाय
तीक्ष्णदंष्ट्राकराय
शूर्पाकारासनस्थाय

ओं गोमेधाभरणप्रियाय नमः
माषप्रियाय २०
काश्यपर्षिनन्दनाय
भुजगेश्वराय
उल्कापातयित्रे
शूलनिधिपाय
कृष्णसर्पराजे
बृषत्पालाभ्रतास्याय
अर्धशरीराय

ओं जाड्यप्रदाय
रवीन्दुभीकराय
छायास्वरूपिणे ३०
कठिनाङ्गकाय
द्विषच्चक्रच्छेदकाय
करालास्याय
भयङ्कराय
क्रूरकर्मणे
तमोरूपाय

ओं श्यामात्मने नमः

नीललोहिताय

किरीटिने

नीलवसनाय ४०

शनिसामन्तवर्त्मगाय

चण्डालवर्णाय

अश्व्यर्क्षभवाय

मेषभवाय

शनिवत्फलदाय

शूलाय

ओं अपसव्यगतये नमः

उपरागकराय

सूर्येन्दुच्छविच्छादकारकाय

नीलपुष्पविहाराय ५०

ग्रहश्रेष्ठाय

अष्टमग्रहाय

कबन्धमात्रदेहाय

यातुधानकुलोद्भवाय

गोविन्दवरपात्राय

देवजातिप्रविष्टकाय

ओं क्रूराय नमः
घोराय
शनेर्मित्राय
शुक्रमित्राय ६०
अगोचराय
मानेगङ्गास्नानदात्रे
स्वगृहे भूबलाढ्यकाय
सद्गृहेऽन्यबलधृते
चतुर्थे मातृनाशकाय

ओं चन्द्रयुतेचण्डालजन्मसूच-
काय नमः
जन्मसिंहाय
राज्यदात्रे
महाकायाय
जन्मकर्त्रे ७०
राज्यदात्रे
मस्तकाज्ञानदाय
जन्मकन्याराज्यदात्रे

ओं जन्महानिदाय
नवमे पितृनाशाय
पञ्चमे शोकदायकाय
द्यूने कलत्रहन्त्रे
सप्तमे कलहप्रदाय
षष्ठे वित्तदात्रे
चतुर्थे वैरदायकाय ८०
नवमे पापदात्रे
दशमे शोकदायकाय
आदौ यशः प्रदात्रे

ओं अन्ते वैरप्रदायकाय नमः
कालात्मने
गोचराचाराय
धनेककुक्प्रदाय
पञ्चमे हषणाशृङ्गदाय
स्वर्भानवे
बलिने ९०
महासौख्यप्रदायिने
चन्द्रवैरिणे
शाश्वताय

ओं सूरशत्रवे नमः
पापग्रहाय
शाम्भवाय
पूज्यकाय
पाठीनपूरणार्थाय
पैठीनसकुलोद्भवाय
भक्तरक्षाय १००
राहुमूर्तये

ओं सर्वाभीष्टफलप्रदाय
दीर्घाय
कृष्णाय
अशिरसे
विष्णुनेत्रारये
देवाय
दानवाय १०८

इति राह्वष्टोत्तरशतनामावलिः सम्पूर्णा ॥

॥ केतुयन्त्रम् ४५ ॥

३	४	९	२	८	७	१	६	५
२	८	७	१	६	५	३	४	९
१	६	५	३	४	९	२	८	७
८	७	२	६	५	१	४	९	३
६	५	१	४	९	३	८	७	२
४	९	३	८	७	२	६	५	१
५	१	६	९	३	४	७	२	८
९	३	४	७	२	८	५	१	
७	२	८	५	१	६	९	३	४

॥ केतुमहामन्त्रः ॥

अस्य श्री केतुमहामन्त्रस्य जयच्छन्दऋषिः ॥ गायत्रीच्छन्दः ॥ केतुर्देवता ॥ केतुप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ धूम्रवर्णाय अङ्गुष्ठाभ्यां नमः ॥ द्विबाहवे तर्जनीभ्यां नमः ॥ केतवे मध्यमाभ्यां नमः ॥ विकृताननाय अनामिकाभ्यां नमः ॥ गृध्रासनाय कनिष्ठि-काभ्यां नमः ॥ लम्बकाय करतलकरपृष्ठाभ्यां नमः ॥ धूम्रवर्णाय हृदयाय नमः ॥ द्विबाहवे शिरसे स्वाहा ॥ केतवे शिखायै वषट् ॥ विकृताननाय कवचाय हुम् ॥ गृध्रासनाय नेत्रत्रयाय वौषट् ॥ लम्बकाय कवचाय फट् ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥

धूम्रवर्णं द्विबाहुं च केतुं च विकृताननम् । गृध्रासनं गतं नित्यं ध्यायेत्सर्वफलाप्तये ॥

लमित्यादि पञ्चपूजा ॥

लं पृथिव्यात्मने गन्धं समर्पयामि ॥ हं आकाशात्मने पुष्पाणि समर्पयामि ॥ यं वाय्वात्मने धूपमाघ्रापयामि ॥ रं वह्न्यात्मने दीपं दर्शयामि ॥ वं अमृतात्मने अमृतोपहारं निवेदयामि ॥ सं सर्वात्मने सर्वोपचारान् समर्पयामि ॥

केतु कृण्वन्नकेतवे पेशोमर्या अपेशसे । समुषद्भिरजायथाः ॥

(यथाशक्ति जपेत् ।। धूम्रवर्णाय हृदयाय नमः ।। इत्यादि सर्वोपचारान् समर्पयामीत्यन्तं पठेत् ।। दिग्बन्ध इत्यत्र दिग्विमोक इति विशेषः ।।) ।। इति केतुमहामन्त्रः ।।

।। केतुकवचम् ।।

अस्य श्री केतुकवचस्तोत्रमहामन्त्रस्य पुरन्दर ऋषिः ।। अनुष्टुप्छन्दः ।। केतुर्देवता ।। केतुप्रसादसिद्ध्यर्थे जपे विनियोगः ।। धूम्रवर्णाय अङ्गुष्ठाभ्यां नमः ।। द्विबाहवे तर्जनीभ्यां नमः ।। केतवे मध्यमाभ्यां नमः ।। विकृताननाय अनामिकाभ्यां नमः ।। गृध्रासनाय

कनिष्ठिकाभ्यां नमः ॥ लम्बकाय करतलतरपृष्ठाभ्यां नमः ॥ धूम्रवर्णाय हृदयाय नमः ॥ द्विवाहवे शिरसे स्वाहा ॥ केतवे शिखायै वषट् ॥ विकृताननाय कवचाय हुम् ॥ गृध्रासनाय नेत्रत्रयाय वौषट् ॥ लम्बकाय अस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम् ॥ धूम्रवर्णं ध्वजाकारं गदावरकरद्वयम् । चित्राम्बरं भजे केतुं चित्रगन्धानुलेपनम् ॥ १ ॥ वैडूर्यरत्नाभरणं वैडूर्यमुकुटोज्ज्वलम् । चित्रं कपोतमारुह्य मेरुं यान्तमदक्षिणम् ॥ २ ॥ केतुं कराळवदनं किरीटकटकोज्ज्वलम् । प्रणमामि सदा देवं ध्वजाकारं महेश्वरम् ॥ ३ ॥ चित्रवर्णः शिरः पातु भालं मे धूम्रवर्णकः । पातु

नेत्रे पिङ्गलाक्षः श्रुती मे रक्तलोचनः ॥ ४ ॥ घ्राणं पातु सुवर्णाभः वदनं सिंहिकासुतः । पातु कण्ठं सदा केतुः स्कन्धौ पातु ग्रहाधिपः ॥ ५ ॥ बाहू पात्वसुरश्रेष्ठः कुक्षिं पातु महोदरः । कटिं कपोतवाहोमे नाभिं नतजनावनः ॥ ६ ॥ ऊरू पातु महाशीर्षः जानुनी च प्रकोपनः । पातु पादौ पापहारी सर्वाङ्गं सूर्यमर्दनः ॥ ७ ॥ प्रातः पातु ग्रहाधीशः सङ्गवे सिंहिकासुतः । मध्याह्ने मुनिवन्द्यो मां सायं सुरनुतोऽवतु ॥८॥ प्रदोषे पूर्वदेवो मां निशीथे च निशाचरः । सन्ध्यायां

सुरशत्रुर्मां सदा केतुश्च पातु माम् ॥ ९ ॥ य इदं कवचं केतोः सर्वरोगविनाशनम् । भक्तियुक्तः पठेन्नित्यं सर्वदुःखैर्विमुच्यते ॥

इति केतुकवचं सम्पूर्णम् ॥

॥ केतुस्तोत्रम् ॥

अस्य श्री केतुस्तोत्रमहामन्त्रस्य वामदेव ऋषिः ॥ अनुष्टुप्छन्दः ॥केतुर्देवता ॥ केतुप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ गौतम उवाच— मुनीन्द्रसूततत्त्वज्ञ सर्वशास्त्रविशारद । सर्वरोगहरं ब्रूहि केतोः स्तोत्रमनुत्तमम् ॥ १ ॥ सूत उवाच—शृणु गौतम वक्ष्यामि स्तोत्रमेत-

त्तुत्तमम् । गुह्याद्गुह्यतमं केतोः ब्रह्मणा कीर्तितं पुरा ॥ २ ॥ आद्यः करालवदनो द्वितीयो रक्तलोचनः । तृतीयः पिङ्गलाक्षश्च चतुर्थो ज्ञानदायकः ॥ ३ ॥ पञ्चमः कपिलाक्षश्च षष्ठः कालाग्निसन्निभः । सप्तमो हिमगर्भश्च धूम्रवर्णोऽष्टमस्तथा ॥ ४ ॥ नवमः कृत्तकण्ठश्च दशमो नरपीठगः । एकादशस्तु श्रीकण्ठः द्वादशस्तु गदायुधः ॥ ५ ॥ द्वादशैते महाक्रूराः सर्वोपद्रवकारकाः । पर्वकाले पीडयन्ति दिवाकर निशाकरौ ॥ ६ ॥ नामद्वादशकं स्तोत्रं केतोरेतन्महात्मनः । पठन्ति येऽन्वहं भक्त्या तेभ्यः केतुः प्रसीदति ॥ ७ ॥ कुलुत्थधान्ये विलि-

खेत् षट्कोणं मण्डलं शुभम् । पद्ममष्टदळं तत्र विलिखेच्च विधा-
नतः ॥ ८ ॥ नीलं घटं च संस्थाप्य दिवाकरनिशाकरौ । केतुं च
तत्र निक्षिप्य पूजयित्वा विधानतः ॥ ९ ॥ स्तोत्रमेतत् पठित्वा च
ध्यायन्केतुं वरप्रदम् । ब्राह्मणं श्रोत्रियं शान्तं पूजयित्वा कुटुम्बिनम्
॥ १० ॥ केतोः कराळवक्त्रस्य प्रतिमां वस्त्रसंयुताम् । कुम्भादिभिश्च
संयुक्तां चित्रातारे प्रदापयेत् ॥ ११ ॥ दानेनानेन सुप्रीतः केतुस्स्या-
त्तस्य सौख्यदः । वत्सरं प्रयता भूत्वा पूजयित्वा विधानतः ॥ १२ ॥
मूलमष्टोत्तरं शतं ये जपन्ति नरोत्तमाः । तेषां केतुप्रसादेन न कदा-
चिद्भयं भवेत् ॥ १३ ॥

इति केतुस्तोत्रं सम्पूर्णम् ॥

॥ केत्वष्टोत्तरशतनामस्तोत्रम् ॥

शृणु नामानि जप्यानि केतोरथ महामते ।
केतुस्स्थूलशिराश्चैव शिरोमात्रो ध्वजाकृतिः ॥ १

नवग्रहयुतस्सिंहिकासुरीगर्भसम्भवः ।
महाभीतिकरश्चित्रवर्णो वै पिङ्गळाक्षकः ॥ २

फलधूम्रसंकाशश्च तीक्ष्णदंष्ट्रो महोरगः ।
रक्तनेत्रश्चित्रकारी तीव्रकोपो महासुरः ॥ ३

पापकण्टः क्रोधनिधिश्छायाग्रहविशेषकः ।
अन्त्यग्रहो महाशीर्षो सूर्यारिः पुष्पवद्ग्रही ॥ ४

चरहस्तो गदापाणिश्चित्रगुप्तधरस्तथा ।
चित्रध्वजपताकश्च घोरश्चित्ररथश्शिखी ॥ ५
कुलुत्थभक्षकश्चैव वैडूर्याभरणस्तथा ।
उत्पातजनकश्शुक्रमित्रोमन्दसखस्तथा ॥ ६
शिखिनेनापकश्चैवांतर्वेदीश्वर एव च ।
जैमिनेर्गोत्रजश्चित्रगुप्तात्मा दक्षिणामुखः ॥ ७
मुकुन्दवरपात्रं च महासुरकुलोद्भवः ।
घनवर्णो लम्बदेवो मृत्युपुत्रस्तथैव च ॥ ८

उत्पातरूपधारी चादृश्यः कालाग्निसन्निभः ।

नृपीठोग्रहकारी च सर्वोपद्रवकारकः ॥ ९
चित्रप्रसूतो ह्यनलस्सर्वव्याधिविनाशकः ।
अपसव्यप्रचारी च नवमे पापदायकः ॥ १०
पञ्चमे शोकदश्चोपरागगोचर एव च ।
अपि पूरुषकर्मा च तुरीये तु सुखप्रदः ॥ ११
तृतीये वैरदः पापग्रहश्च स्फोटकारकः ।
प्राणनाथः पञ्चमे तु श्रमकारक एव च ॥ १२

द्वितीये स्फुटवाग्दाता विषाकुलितवक्त्रकः ।

कामरूपी सिंहदन्तस्सत्येऽप्यनृतवानपि ॥ १३

चतुर्थे मातृनाशश्च नवमे पितृनाशकः ।
अन्ते वैरप्रदश्चैव सुतानन्दनबन्धकः ॥ १४

सर्पाक्षिजातोऽनङ्गश्च कर्मराश्युद्भवस्तथा ।
उपान्ते कीर्तिदश्चैव सप्तमे कलहप्रदः ॥ १५

अष्टमे व्याधिकर्ता च धने बहुसुखप्रदः ।
जनने रोगदश्चोर्ध्वमूर्धजो ग्रहनायकः ॥ १६

पापदृष्टिः खेचरश्च शाम्भवो शेषपूजितः ।

शाश्वतश्च नटश्चैव शुभाशुभफलप्रदः ॥ १७

धूम्रश्चैव सुधापायी ह्यजितो भक्तवत्सलः ।
सिंहासनः केतुमूर्ती रवीन्दुद्युतिनाशकः ॥ १८
अमरः पीडकोऽमर्त्यो विष्णुदृष्टासुरेश्वरः ।
भक्तरक्षोऽथ वैचित्रकपोतस्यन्दनस्तथा ॥ १९
विचित्रफलदायी च भक्ताभीष्टफलप्रदः ।
यो भक्त्येदं जपेत् केतुनाम्नामष्टोत्तरं शतम् ॥
स तु केतोः प्रसादेन सर्वाभीष्टं समाप्नुयात् ॥ २०

इति केत्वष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

॥ केत्वष्टोत्तरशतनामावळिः ॥

ओं केतवे नमः
स्थूलशिरसे
शिरोमात्राय
ध्वजाकृतये
नवग्रहयुताय
सिंहिकासुरीगर्भसम्भवाय
महाभीतिकराय
चित्रवर्णाय
श्रीपिङ्गळाक्षाय

ओं फलधूम्रसङ्काशाय नमः १०
तीक्ष्णदंष्ट्राय
महोरगाय
रक्तनेत्राय
चित्रकारिणे
महासुराय
तीव्रकोपाय
पापकण्टकाय
क्रोधनिधये

ओँ छायाग्रहविशेषकाय
अन्त्यग्रहाय २०
महाशीर्षाय
सूर्यारये
पुष्पवद्ग्राहिणे
वरहस्ताय
गदापाणये
चित्रशुभ्रधराय
चित्रध्वजपताकाय

ओँ घोराय नमः
चित्ररथाय
शिखिने ३०
कुलुत्थभक्षकाय
वैडूर्याभरणाय
उत्पातजनकाय
शुक्रमित्राय
मन्दसखाय
शिखिनेनापकाय

ओं अन्तर्वेदिने नमः

ईश्वराय

जैमिनिगोत्रजाय

चित्रगुप्तात्मने ४०

दक्षिणामुखाय

मुकुन्दवरपात्राय

आसुरकुलोद्भवाय

घनवर्णाय

लम्बदेवाय

मृत्युपुत्राय

ओं उत्पातरूपधराय नमः

अदृश्याय

कालाग्निसन्निभाय

नरपीठकाय ५०

ग्रहकारिणे

सर्वोपद्रवकारकाय

चित्रप्रसूताय

अनलाय

सर्वव्याधिनाशकाय

अपसव्यप्रचारिणे

ओं नवमे पापदाय नमः
पञ्चमे शोकदाय
उपरागगोचराय
पूरुषकर्मणे ६०
तुरीये सुखप्रदाय
तृतीये वैरदाय
पापग्रहाय
स्फोटकारकाय
प्राणनाथाय

ओं पञ्चमे श्रमकारकाय नमः
द्वितीये ऽस्फुटवाग्दात्रे
विषाकुलितवक्त्रकाय
कामरूपिणे
सिंहदन्ताय ७०
सत्येप्यनृतवते
चतुर्थे मातृनाशाय
नवमे पितृनाशकाय
अन्त्ये वैरप्रदाय

ओं सुतानन्दनबन्धकाय नमः
सर्पाक्षिजाताय
अनङ्गाय
कर्मराश्युद्भवाय
उपान्ते कीर्तिदाय
सप्तमे कलहप्रदाय ८०
अष्टमेव्याधिकर्त्रे
धने बहुसुखप्रदाय
जनने रोगदाय
ऊर्ध्वमूर्धजाय

ओं ग्रहनायकाय नमः
पापदृष्टये
खेचराय
शाम्भवाय
अशेषजनपूजिताय
शाश्वताय ९०
नटाय
शुभाशुभफलप्रदाय
धूम्राय
सुधापायिने

ओं अजिताय नमः
भक्तवत्सलाय
सिंहासनाय
केतुमूर्तये
रवीन्दुद्युतिनाशकाय
अमराय १००
पीडकाय

ओं अमर्त्याय नमः
विष्णुदृष्टाय
असुरेश्वराय
भक्तरक्षाय
वैचित्रकपोतस्यन्दनाय
विचित्रफलदायिने
भक्ताभीष्टफलप्रदाय

इति केत्वष्टोत्तरशतनामावळिः सम्पूर्णा ॥

॥ नवग्रहमङ्गलाष्टकम् ॥

भास्वान् काश्यपगोत्रजोऽर्कजसमिसिंहाधिनाथोऽरुणो
भौमेड्येन्दुसुहृद्गुणायसहजस्थानस्थितौ शोभनः ।
आयुर्जन्मकळत्रगोऽशुभफलः काळिङ्गनाथो महान्
मध्येवर्तुलमण्डलस्थितियुतः कुर्यात्सदा मङ्गळम् ॥ १

चन्द्रः कर्कटकप्रभुस्सितनिभश्चात्रेयगोत्रोद्भव-
श्चाग्नेये चतुरश्रवारणमुखश्चापे उमाधीश्वरः ।
षट्सप्ताग्नि दशैकशोभनफलो नोरिर्बुधार्कप्रियः
स्वामी यामुनदेशपर्णसमिधः कुर्यात्सदा मङ्गळम् ॥ २

भौमो दक्षिणदिक्त्रिकोणयमदिग्विन्ध्येश्वरः खादिरः
स्वामी वृश्चिकमेषयोस्सुरगुरुश्चार्कश्शशी सौहृदः ।
ज्ञोऽरिष्षट्त्रिफलप्रदश्च वसुधा स्कन्दौ क्रमाद्देवते
भारद्वाजकुलोद्वहोऽरुणरुचिः कुर्यात्सदा मङ्गलम् ॥ ३

सौम्यः पीत उदङ्मुखस्समिदपामार्गोऽत्रिगोत्रोद्भवः
बाणेशानदिशस्सुहृद्रविसुतश्शेषास्समाश्शीतगोः ।
कन्यायुग्मपतिर्दशाष्टचतुरष्षण्णेत्रगश्शोभनः
विष्णुर्देव्यधिदेवते मगधपः कुर्यात्सदा मङ्गलम् ॥ ४

जीवश्चाङ्गिरगोत्रजोत्तरमुखो दीर्घोत्तराशास्थितः
पीतोऽश्वत्थसमिद्धसिन्धुजनितश्चापोऽथ मीनाधिपः ।
सूर्येन्दुक्षितिजप्रियो बुधसितौ शत्रू समाश्चापरे
सप्त द्वे नव पंचमे शुभकरः कुर्यात्सदा मङ्गळम् ॥ ५

शुक्रोभार्गवगोत्रजस्सितनिभः पूर्वामुखः पूर्वदिक्
पाञ्चालस्थवृषस्तुलाधिपमहाराष्ट्राधिपौदुम्बरः ।
इन्द्राणीमघवा बुधश्च रविजो मित्रोऽर्कचन्द्रावरी
षष्ठात्रिदशवर्जिते भृगुसुतः कुर्यात्सदा मङ्गळम् ॥ ६

मन्दः कृष्णनिभः सपश्चिममुखः सौराष्ट्रपः काश्यपः
स्वामी नक्रसुकुम्भयोः बुधसितौ मित्रौ कुजेन्दू द्विषौ ।
स्थानं पश्चिमदिक्प्रजापति यमौ देवौ धनुष्यासनौ
षट्त्रिस्थश्शुभकृच्छमीरविसुतः कुर्यात्सदा मङ्गळम् ॥ ७

राहुस्सिंहळदेशपो निर्ऋतिः कृष्णाङ्गशूर्पासनः
यः पैठीनसगोत्रसम्भवसमिद्दूर्वामुखो दक्षिणः ।
यस्सर्पः पशुदैवतो निर्ऋतिः प्रत्याधिदेवस्सदा
षट्त्रिस्थश्शुभकृच्च सिंहगसुतः कुर्यात्सदा मङ्गळम् ॥ ८

केतुर्जैमिनिगोत्रजः कुशसमिद्वायव्यकोणे स्थितः
चित्राङ्कध्वजलाञ्छनो हि भगवान्यो दक्षिणाशामुखः ।
ब्रह्माचैव तु चित्रगुप्तपतिमान्प्रीत्याधिदेवस्सदा
षट्त्रिस्थश्शुभकृच्च बर्बरपतिः कुर्यात्सदा मङ्गलम् ॥ ९

इति श्रीमदादित्यादि नवग्रहमङ्गलाष्टकं सम्पूर्णम्

॥ श्रीविष्णुकवचम् ॥

अस्य श्रीविष्णुकवचमहामन्त्रस्य ब्रह्माऋषिः ॥ गायत्री च्छन्दः ॥ श्रीमहाविष्णुर्देवता ॥ अच्युताय बीजम् ॥ अनन्ताय शक्तिः ॥ गोविन्दाय कीलकम् । श्रीमहाविष्णुप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ केशवाय अङ्गुष्ठाभ्यां नमः ॥ नारायणाय तर्जनीभ्यां नमः ॥ माधवाय मध्यमाभ्यां नमः ॥ गोविन्दाय अनामिकाभ्यां नमः ॥ विष्णवे कनिष्ठिकाभ्यां नमः ॥ मधुसूदनाय करतलकरपृष्ठाभ्यां नमः ॥ त्रिविक्रमाय हृदयाय नमः ॥ वामनाय शिरसे स्वाहा ॥ श्रीधराय शिखायै वषट् ॥ हृषीकेशाय कवचाय हुम् ॥ पद्मनाभाय नेत्रत्रयाय वौषट् ॥ दामोदराय अस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

॥ ध्यानम् ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाकारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ १

पूर्वतो मां हरिः पातु पश्चाच्चक्री च दक्षिणे ।
कृष्ण उत्तरतः पातु श्रीशो विष्णुश्च सर्वतः ॥ २

ऊर्ध्वं मां नन्दकी पातु अधस्ताच्छार्ङ्गभृत्सदा ।

पादौ पातु सरोजाङ्घ्रिः जङ्घे पातु जनार्दनः ॥ ३

जानुनी मे जगन्नाथः ऊरू पातु त्रिविक्रमः ।
गुह्यं पातु हृषीकेशः पृष्ठं पातु ममाव्ययः ॥ ४

पातु नाभिं ममानन्तः कुक्षिं राक्षसमर्दनः ।
दामोदरो मे हृदयं वक्षः पातु नृकेसरी ॥ ५

कक्षौ मे काळियारातिः भुजौ भक्तार्तिभञ्जनः ।
कण्ठं कालाम्बुदश्यामः स्कन्धौ मे कंसमर्दनः ॥ ६

नारायणोऽव्यान्नासां मे कर्णौ केशिप्रभञ्जनः ।

कपोलौ पातु वैकुण्ठो जिह्वां पातु दयानिधिः ॥ ७

आस्यं दशास्यहन्ताऽव्यात् नेत्रे मे पद्मलोचनः ।
भ्रुवौ मे पातु भूमीशो ललाटं मे सदाच्युतः ॥ ८

मुखं मे पातु गोविन्दः शिरो गरुडवाहनः ।
मां शेषशायी सर्वेभ्यो व्याधिभ्यो भक्तवत्सलः ॥ ९

पिशाचाग्निजलेभ्यो मां पापेभ्यः पातु वामनः ।
सर्वेभ्यो दुरितेभ्यश्च पातु मां पुरुषोत्तमः ॥ १०

य इदं विष्णुकवचं सर्वमङ्गळदायकम् ।
सर्वरोगप्रशमनं सर्वशत्रुनिवारणम् ॥ ११

आपत्कालेषु पठतामात्मरक्षाकरं परम् ।
त्रिसन्ध्यं च पठेच्छुद्धः सर्वत्र विजयी भवेत् ॥ १२

इति श्रीविष्णुकवचं सम्पूर्णम् ॥

॥ श्रीरस्तु ॥

॥ नवग्रहस्तोत्रग्रन्थस्थ विषयसूचिका ॥

विषयसूचिका

विषयसूचिका समाप्ता

Printed at the 'Sri Rama' Press, Madras.

Printed at the "Sri Rama" Press, Madras.

॥ श्रीमन्महाभारतम् ॥

इदं किल

दाक्षिणात्यप्राचीनतालकोशेभ्यस्समुद्धृतं श्लोकानां लक्षेण परिकर्मितं सद्भिः प्रमाणतमतया परिगृहीतमित्येवाष्टादशसम्पुटात्मकं मुद्रापितं सद्भिर्जयते ॥

			रू.	अ.
आदिपर्व (सम्पुटद्वयात्मकम्)	...	...	८	०
सभापर्व	...	...	४	०
वनपर्व (सम्पुटद्वयात्मकम्)	...	...	८	०
विराटपर्व	...	...	४	०
उद्योगपर्व	...	...	४	०
भीष्मपर्व	...	...	४	०
द्रोणपर्व (सम्पुटद्वयात्मकम्)	...	...	८	०

			रू.	अ.
कर्णपर्व	...	...	४	०
शल्य, स्त्री, सौप्तिकपर्वाणि	...	...	४	०
शान्तिपर्व (सम्पुटत्रयात्मकम्)	...	...	१२	०
अनुशासनपर्व (सम्पुटद्वयात्मकम्)	...	...	८	०
आश्वमेधिक, आश्रमवास, मौसल, महाप्रस्थान, स्वर्गारोहणपर्वाणि			४	०
श्रीमद्भागवतम् (मूलमात्रम्) सम्पुटद्वयात्मकम्		...	१५	०

अत्र कार्यालये द्रविडान्ध्राङ्गलभाषामया: ग्रन्थाः सर्वेऽप्युपलभ्यन्ते ॥

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्,

२९२, एस्प्लनेड्, चेन्नपुरी.